CC0. In Public Domain, Digitizagtion by eGangotri

1.3

28/4/13

श्रीसूक्तम्

आम्नाय-ग्रन्थालय,
भरतनिधि, करौंदी
वाराणसी-5

-ग्रन्थालय
ौंदी, वाराणसी-५
8/4/13

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ श्री सूक्तम् ॥

आम्नाय-ग्रन्थालय

राजवैद्य जीवराम कालिदास शास्त्रि
विरचित प्रयोग पूजापद्धति
श्री प्रसादिनी संस्कृत-गुर्जरटीका पुरश्चरणादि विविध विषय संयुक्तम् ॥

चतुर्थावृत्तिः

प्रकाशन स्थानं
रसशाला औषधाश्रम
गोंडल, काठीयावाड,

SHRI SUKTAM

Including Prayogas & Pujanavidhi;
ri Prasadini Sanskrit and Gujarati Commentaries,
Purascharana and other subjects.

By

Rajvaidya J. K. Shastri.

Publised by
IE RASASHALA AUSHADHASHRAM
GONDAL, KATHIAWAR, INDIA.

4t Edition.
ecember 1947 A. D. Kartik 2004 Vikram Samvat.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ श्रीसूक्तानुक्रमणिका ॥

विषयः	पृष्ठांकः
प्रयोग	१
कलामातृका न्यासः	२
मातृका न्यासः	”
अंग न्यासः	४
व्याहृति न्यासः	६
श्री सूक्त न्यासः	”
आवरणपूजनं	९
विष्णुस्तवः	११
प्रथमांग पूजा	१४
द्वितीयांग पूजा	१५
षोडश युग्म पूजा	१६
श्री सूक्त पाठः	१७
स्तुति पाठः	१८

विषयः	पृष्ठांकः
श्री सूक्त पुरश्चरण विधिः	२१
श्री सूक्त होम प्रयोगः	२२
श्री सूक्तस्य श्री प्रसादिनी संस्कृत टीका	३१
श्री सूक्तनी श्री प्रसादिनी संस्कृत टीकानु गुजराती	३६
पुरुषसूक्तनु गुजराती भाषांतर	४०
स्तुति पाठनुं गुजराती भाषांतर	४३
श्री सूक्तना प्रयोगो	४८
पुरश्चरणविधिः	५६
अथ विष्णु स्तवः	५८
अथ कनकधारा स्तवः	९५

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ श्री सूक्तनी प्रस्तावना ॥

श्री सूक्त प्रजानुं परम कल्याण साधनारुं छे. पुरुष सूक्त अने श्री सूक्त आ बे सूक्त वेदना अनेक सूक्तोमां मुख्य तथा तत्काळ सिद्धि आपनारां छे. पुरुष सूक्तमां ब्रह्मरूप भगवान नारायण विष्णुनुं अने श्री सूक्तमां विष्णुनी शक्तिनुं स्तवन छे. पुरुष सूक्तना स्तवनथी परलोकनुं कल्याण थाय छे अने श्री सूक्तना स्तवनथी आ लोकमां मनुष्य धन धान्य ऐश्वर्य अने सर्व प्रकारनां सुख मेळवी शके छे. जगत्‌ आखामां आ लोकना कल्याण माटे शक्तिनी उपासनाज मुख्य छे. दरेक धर्म पंथ अने संप्रदायमां शक्ति जुदां जुदां नाम रूप आकृति अने भेदथी पूजाय छे श्री रूप लक्ष्मी देवीनुं स्तवन भजन पूजन दरेक संप्रदायमां एक सरखुं छे. ए लक्ष्मी देवीना आराधन रूपी श्री सूक्त प्रत्येक मार्गवाळाने मान्य छे. श्रीमान्‌ महर्षि दयानंद स्वामी जेवा पुरुषे पण शरुआतमां छपावेला संध्याना पुस्तकमां श्री सूक्तने मूकी लक्ष्मीना स्तवन पूजनने स्वीकार्युं छे. श्री वराह मिहिराचार्य कृत बृहत्‌ संहिता (वाराही संहिता) ना पुष्यस्नानीय नामना अध्यायमां तथा सुश्रुत संहिता चिकित्सा स्थानना २८ मा मेधायुष्कामीय अध्यायमां श्री सूक्तना प्रयोग छे. वेद उपनिषद् आयुर्वेद ज्योतिष वगेरे शास्त्रो तेमज पुराणोमां श्री सूक्तना जुदी जुदी कामना सिद्धि माटे प्रयोग वर्णव्या छे. आ रीते प्रत्येक शास्त्रकारे विविध काम्य कर्मनी सिद्धि माटे तथा आ लोक परलोकना कल्याण माटे श्री सूक्तनुं प्राधान्य स्वीकार्युं छे.

ब्राह्मण क्षत्रिय वैश्य शूद्र प्रत्येक वर्णना तथा ब्रह्मचर्य गृहस्थ वानप्रस्थ अने संन्यास प्रत्येक आश्रमना मनुष्योये विद्यार्थीयो स्त्रीयो, युवानो, वृद्धोये संसारमां रही दरेक प्रकारनुं शारीरिक मानसिक सुख मेळववा इच्छनाराओये, संसारमां सुखी जीवन वितावी उत्तम लोकनी प्राप्ति माटे श्री सूक्तनी उपासना अवश्य करवी जोइये. राजा के रंक दरेकने संसार व्यवहारनी शरीरनी मननी स्त्री पुरुष पति पुत्र वगेरे कुटुंबीओनी विविध उपाधिओ वळगेली होय छे. आधि व्याधि रोग क्लेश दुःख संताप निर्धनता वगेरेमांथी मुक्त थइ शांत सुखी जीवन विताववानी इच्छावाळा बधा संप्रदायनां बधी कोमनां बधा धर्मनां मनुष्यो आ श्री सूक्त द्वारा श्री तुं लक्ष्मीनुं पूजन अर्चन आराधन करे तो दरेकनो मन कामना सफळ थाय.

आज सुधी श्री सूक्तनां पुस्तक घणां छापखानां संस्थाओ अने विद्वानो तरफथी प्रसिद्ध थयेल छे. जेने जे हस्तलिखित प्रत मळेली ते प्रमाणे सौये आपेल हशे. अमने मळेली प्रत प्रमाणे संवत्‌ १९९० मां प्रथम आवृत्ति २ हजार कोपी छापी त्यारपछी राजकुटुंबीओ अने दरेक वर्गना देवी भक्तोनी मोटी मागणीयो आववाथी संवत्‌ १९९१ ना वैशाखमां ५ हजार प्रत बीजी आवृत्तिनी छापी प्रसिद्ध करेल ते खलास थवाथी अने मागणी बहु वधवाथी त्रीजी आवृत्ति संवत्‌ १९९९ मां छपावेली ते खलास थयां घणो वखत थयो. हाल ४ थी आवृत्ति प्रसिद्ध थाय छे. आज सुधीमां अमने ९–१० हस्तलिखित प्रतो मळेली ते बधीनुं एकीकरण करीने आ पुस्तक छपावेल छे. प्रथमनी आवृत्ति करतां आमां घणो सुधारो वधारो थयो छे गुजराती अक्षर वांची नही शकनाराओ माटे भाषांतर के प्रयोगो भाषा गुजरातीमां छतां बाळबोध अक्षरमां छाप्युं छे.

व्यवस्थापकः–

मागशर संवत्‌ २००४
गोंडल.

रसशाळा औषधाश्रम.

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्री गणेशाय नमः श्री महालक्ष्म्यै नमः ॥

॥ अथ श्रीसूक्तम् ॥

प्रयोगः

कर्ता स्नात्वाऽऽचम्य आसने उपविश्य मूलेन त्रिपुंड्रं कृत्वा संध्यां विधाय समयश्चेत् भूतशुद्धि प्राणप्रतिष्ठां च कृत्वा मूलगायत्र्या महालक्ष्म्यै अर्घ्यत्रयं दत्वा मूल गायत्रीं द्वादशधा जपेत । जपं समर्प्य मूलेन प्राणानायम्य देशकालौ संकीर्त्य अद्यपूर्वोच्चरित वर्तमान शुभपुण्य तिथौ ममात्मनः सकुटुंबिनः श्रुति स्मृतिपुराणोक्तशुभफलप्राप्त्यर्थं सकलकामना सिद्ध्यर्थं श्रीसूक्तप्रयोगमहं करिष्ये ।

अस्य श्री हिरण्यवर्णामिति पञ्चदशर्चस्य श्रीसूक्तस्य आद्यमन्त्रस्य लक्ष्मीर्ऋषिः । तदुत्तरचतुर्दशमन्त्राणां आनंदकर्दमचिक्लीतेन्दिरासुता ऋषयः । जातवेदोग्निर्दुर्गाः श्रीर्महालक्ष्मीर्देवता आद्यानां तिसृणामनुष्टुप्छंदः । चतुर्थमंत्रस्य बृहतीच्छंदः । पंचम षष्ठयोः त्रिष्टुप्छंदः । सप्तम्यादि चतुर्दशपर्यंतं अनुष्टुप्छंदः । पंचदशस्य प्रस्तारपंक्तिच्छंदः । व्यंजनानि बीजानि । स्वराः शक्तयः । बिन्दवः कीलकम् । मम अलक्ष्मीपरिहारपूर्वकं दशविधलक्ष्मीप्राप्त्यर्थं श्रीसूक्तपाठे होमे न्यासे जपे पूजने प्रयोगे विनियोगः ।

अत्राद्य विक्रम संवत्........ कस्य अमुक मासे अमुक पक्षे अमुक तिथौ अमुक वासरे मम सकलमनोरथसिद्ध्यर्थं मम शरीरस्य सहकुटुंबिन आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं सकलदोषपरिहारार्थं पापक्षयार्थं सकलजनवशीकरणार्थम् श्रीसूक्तहोमं पाठं वाहं करिष्ये ।

आचम्य । प्राणानायम्य । संकल्पः । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । इति स्मरणम् । तद्विप्रासो विपन्यवो जागृवा ०—० समिंधते ॥ विष्णोर्यत्परमं पदम् । इति शिखाबंधनम् ॥ ततः

॥ अथ छंदःपुरुषन्यासः ॥

तिर्यग् बिलाय चमसायोर्ध्वबुध्नाय छंदःपुरुषाय नमः ॥ शिरसि ॥ गौतम भारद्वाजाभ्यां नमः अक्ष्णोः । विश्वामित्रजमदग्निभ्यां नमः श्रोत्रयोः । वसिष्ठकश्यपाभ्यां नमः नासिकयोः ॥ अत्रये नमः वाचि ॥ गायत्र्यै अग्नये च नमः शिरसि ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उष्णिहे सवित्रे च नमः ग्रीवायां ॥ बृहत्यै बृहस्पतये च नमः अनूके ॥ बृहद्रथंतराभ्यां द्यावा पृथिवीभ्यां नमः बाह्वोः ॥ त्रिष्टुभ इंद्राय च नमः मध्ये ॥ जगत्यै आदित्याय च नमः श्रोत्रयोः ॥ अतिछंदसे प्रजापतये नमः मेढ्रे ॥ यज्ञाय वैश्वानराय च नमः पायौ ॥ अनुष्टुभे विश्वेभ्यो देवेभ्यो नमः ऊर्वोः ॥ पंक्त्यै मरुद्भ्यश्च नमः गुल्फयोः ॥ द्विपदायै विष्णवे च नमः पादयोः ॥ विच्छंदसे वायवे च नमः प्राणेषु ॥ न्यूनाक्षराय अद्भ्यश्च नमः सर्वांगेषु । न्यूनातिरिक्तेष्वंगेषु ॥

॥ अथ कमलामातृका न्यासः ॥

अस्य श्री कमलामातृका न्यासस्य भृगुर्ऋषिः गायत्री च्छंदः । संपत्प्रदा देवता । हलः बीजानि । स्वराः शक्तयः । अभीष्ट सिद्ध्यर्थे न्यासे विनियोगः । श्रां हृदयाय नमः । श्रीं शिरसे स्वाहा । श्रूं शिखायै वषट् । श्रैं कवचाय हुं । श्रौं नेत्रत्रयाय वौषट् । श्रः अस्त्राय फट् ॥

ध्यानम्—विद्युद्दाम समप्रभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैः
शुंडादंड समुद्धृतामृतघटैरासिच्यमानां रमां ॥
बिभ्राणां करपंकजैर्जपवटीं पद्मद्वयं पुस्तकम्
भास्वद्रत्नसमुज्ज्वलां कुचनतां ध्यायेज्जगत्स्वामिनीम् ॥१॥

मानसोपचारैः संपूज्यः । ॐ श्रीं अं नमः शिरसि एवं क्रमेण ॐ श्रीं क्षं नमः हृदयादि मुखांतं । इति न्यासः ॥

अथ केशवादि मातृका न्यासः ॥

अस्य श्री केशवादि मातृका न्यासस्य रुद्र ऋषिः ॥ गायत्री छंदः । श्री लक्ष्मी-नारायणो हरिर्देवता । क्लीं बीजम् । स्वराः शक्तयः । अभीष्टसिद्ध्यर्थे न्यासे विनियोगः । क्लां हृदयाय नमः । क्लीं शिरसे स्वाहा । क्लूं शिखायै वषट् । क्लैं कवचाय हुं । क्लौं नेत्रत्रयाय वौषट् । क्लः अस्त्राय फट् ।

ध्यानम्—हस्तैर्बिभ्रत्सरसिज गदा शंख चक्राणि विद्याम्
पद्मादर्शौ कनककलशं मेघ विद्युद्विलासम् ॥
वामोत्तुंगस्तनमविरलं कल्पमाश्लेषलोभा-
देकीभूतं वपुरवतु नः पुंडरीकाक्षलक्ष्म्योः ॥

॥ मानसोपचारैः संपूज्य ततो न्यासः ॥

ॐ श्री क्लीं अं	केशवाय	कीर्त्यै नमः ॥	शिरसि
,, ,, ,, आं	नारायणाय	कांत्यै नमः ॥	मुखवृत्ते
,, ,, ,, इं	माधवाय	तुष्ट्यै नमः ॥	दक्षनेत्रे
,, ,, ,, ईं	गोविंदाय	पुष्ट्यै नमः ॥	वामनेत्रे
,, ,, ,, उं	विष्णवे	धृत्यै नमः ॥	दक्षकर्णे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐ	श्रीं	क्लीं	ऊं	मधुसूदनाय	क्षांत्यै नमः ॥	वामकर्णे
,,	,,	,,	ऋं	त्रिविक्रमाय	क्रियायै नमः ॥	दक्षनासि
,,	,,	,,	ॠं	वामनाय	दयायै नमः ॥	वामनासि
,,	,,	,,	लृं	श्रीधराय	मेधायै नमः ॥	दक्षकपोले
,,	,,	,,	ॡं	हृषीकेशाय	हर्षायै नमः ॥	वामकपोले
,,	,,	,,	एं	पद्मनाभाय	श्रद्धायै नमः ॥	ऊर्ध्वोष्ठे
,,	,,	,,	ऐं	दामोदराय	लज्जायै नमः ॥	अधरोष्ठे
,,	,,	,,	ओं	वासुदेवाय	लक्ष्म्यै नमः ॥	ऊर्ध्वदंतपंक्तौ
,,	,,	,,	औं	संकर्षणाय	सरस्वत्यै नमः ॥	अधोदंतपंक्तौ
,,	,,	,,	अं	प्रद्युम्नाय	प्रीत्यै नमः ॥	जिव्हायां
,,	,,	,,	अः	अनिरुद्धाय	रत्यै नमः ॥	ग्रीवायां
,,	,,	,,	कं	चक्रिणे	जयायै नमः ॥	दक्षस्कंधे
,,	,,	,,	खं	गदिने	दुर्गायै नमः ॥	दक्षकूर्परे
,,	,,	,,	गं	शार्ङ्गिणे	प्रजायै नमः ॥	दक्षमणिवंधे
,,	,,	,,	घं	खड्गिने	सत्यायै नमः ॥	दक्षहस्तांगुलिमूले
,,	,,	,,	ङं	शंखिने	चंडायै नमः ॥	दक्षहस्तांगुल्यग्रे
,,	,,	,,	चं	हलिने	वाण्यै नमः ॥	वामस्कंधे
,,	,,	,,	छं	मुसलिने	विलासिन्यै नमः ॥	वामकूर्परे
,,	,,	,,	जं	शूलिने	विजयायै नमः ॥	वाममणिवंधे
,,	,,	,,	झं	पाशिने	विरजायै नमः ॥	वामकरांगुलिमूले
,,	,,	,,	ञं	अंकुशिने	विश्वायै नमः ॥	वामकरांगुल्यग्रे
,,	,,	,,	टं	मुकुंदाय	विमदायै नमः ॥	दक्षपादमूले
,,	,,	,,	ठं	नंदजाय	सुनंदायै नमः ॥	दक्षजानुनि
,,	,,	,,	डं	नंदिने	स्मृत्यै नमः ॥	दक्षपादगुल्फे
,,	,,	,,	ढं	नराय	ऋद्ध्यै नमः ॥	दक्षपादांगुलिमूले
,,	,,	,,	णं	नरकजिते	समृद्ध्यै नमः ॥	दक्षपादांगुल्यग्र
,,	,,	,,	तं	हरये	शुद्ध्यै नमः ॥	वामपादमूले
,,	,,	,,	थं	कृष्णाय	बुद्ध्यै नमः ॥	वामपादजानुनि
,,	,,	,,	दं	सत्याय	मुक्त्यै नमः ॥	वामपादमुले
,,	,,	,,	धं	सात्वताय	मत्यै नमः ॥	वामपादांगुलिमूले
,,	,,	,,	नं	शौरये	क्षमायै नमः ॥	वामपादांगुल्यग्रे
,,	,,	,,	पं	शूराय	रमायै नमः ॥	दक्षपार्श्वे
,,	,,	,,	फं	जनार्दनाय	उग्रायै नमः ॥	वामपार्श्वे
,,	,,	,,	बं	भूधराय	क्लेदिन्यै नमः ॥	पृष्ठे
,,	,,	,,	भं	विश्वमूर्त्तये	क्लिन्नायै नमः ॥	नाभौ
,,	,,	,,	मं	वैकुंठाय	वसुदायै नमः ॥	उदरे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐ श्रीं क्लीं यं त्वगात्मने पुरुषोत्तमाय वसुधायै नमः हृदि
" " " रं असृगात्मने बलिने परायै नमः दक्षांसे
" " " लं मांसात्मने बलानुजाय परायणायै नमः ककुदि
" " " वं वेदात्मने बलाय सूक्ष्मायै नमः वामांसे
" " " शं अस्थ्यात्मने वृषभाय संध्यायै नमः हृदयादि दक्षकरांतम्
" " " षं मज्जात्मने वृषाय प्रज्ञायै नमः ॥ " वामकरांतम्
" " " सं शुक्रात्मने हंसाय प्रभायै नमः ॥ " दक्षपादांतम्
" " " हं प्राणात्मने वराहाय निशायै नमः ॥ " वामपादांतम्
" " " ळं शक्त्यात्मने विमलाय अमोघायै नमः ॥ " जठरांतम्
" " " क्षं क्रोधात्मने नृसिंहाय विद्युतायै नमः ॥ " मुखांतम्

॥ अथ पुरुषसूक्त न्यासः ॥

अस्य श्री पुरुषसूक्तमंत्रस्य नारायण ऋषिः । आद्याः पंचदश अनुष्टुभः । अंत्या त्रिष्टुभः । पुरुषो देवता । जगद्बीजं न्यासे विनियोगः ॥

अस्य श्री उत्तर नारायण सूक्तस्य नारायण ऋषिः । आद्यानां तिसृणां त्रिष्टुप्छंदः । चतुर्थ पंचमयोरनुष्टुप्छंदः । अंत्यायाः त्रिष्टुप्छंदः । आदित्यो देवता न्यासे विनियोगः ।

अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्तताग्रे । तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे । हृदयाय नमः ।

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् । तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय । शिरसे स्वाहा ।

प्रजापतिश्चरति गर्भे अंतरजायमानो बहुधा विजायते । तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा । शिखायै वषट् ।

यो देवेभ्य आतपति यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये । कवचाय हुं ।

रुचं ब्राह्मं जनयंतो देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन् वशे । नेत्रत्रयाय वौषट् ।

श्रीश्च ते लक्ष्मीश्च पत्न्या वहो रात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुं म इषाण सर्वं लोकं म इषाण । अस्त्राय फट् ।

॥ अथांगन्यासः ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । सभूमिꣳ सर्वतः स्पृत्वात्यतिष्ठद् दशाङ्गुलम् ॥ वामकरे ।

पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ दक्षिण करे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एतावानस्य महिमातो ज्यायाँश्च पुरुषः। पादोऽस्य विश्वाभूतानि त्रिपादस्यादमृतं दिवि। वामपादे।

त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः। ततोविष्वङ् व्यक्रामत् साशनानशने अभि॥ दक्षिणपादे।

ततो विराडजायत विराजो अधि पुरुषः। सजातो अत्यरिच्यत पश्चाद् भूमिमथोपुरः। वामजानुनि।

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम्। पशूँस्ताँश्चक्रे वायव्या नारण्या ग्राम्याश्चये। दक्षिणजानुनि।

तस्माद्यज्ञात्सर्व हुतऋचः सामानि जज्ञिरे। छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत। वामकट्यां।

तस्माद्यश्वा अजायन्त येकेचोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः। दक्षिणकट्यां।

तंयज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः। तेन देवा अयजन्त साध्या ऋषयश्च ये। नाभौ।

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्यासीत् बाहू किमूरु पादावुच्येते। हृदये।

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः। उरू तदस्य यद्वैश्यः पद्भ्यांꣳशूद्रो अजायत। वामबाहौ।

चंद्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत। दक्षिणबाहौ।

नाभ्याआसीदंतरिक्षꣳशीर्ष्णोद्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ ऽ अकल्पयन्। कंठे।

यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः। मुखे।

सप्तास्यासन् परिधयस्त्रिःसप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम्। नेत्रयोः।

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।

तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः। मूर्ध्नि।

॥ आसने चिंतयेन्मेरुमष्टदलं सकर्णिकम्॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ अथ व्याहृतिन्यासः ॥

भूः पादयोः । भुवः जान्वोः । स्वः कट्यां । महः नाभौ । जनः हृदि । तपः कंठेः । सत्यं भ्रूमध्ये । भूर्भुवः स्वरोम् इति दिग्बंधः ।

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् ॥
तच्छुभ्रं ज्योतिषां ज्योतिस्तत्सदात्मविदो विदुः ॥ १ ॥

॥ अथ श्री सूक्त न्यासः ॥

ॐ अस्य श्री हिरण्यवर्णामिति पंचदशर्चस्य श्रीसूक्तस्यानंदकर्दमाचिक्लीतेंदिरासुता महर्षयः । श्रीरग्निर्देवता । आद्यास्तिस्रोनुष्टुभः चतुर्थी बृहती पंचमीषष्ठ्यौ त्रिष्ठुभौ । ततोऽष्टावनुष्टुभः अंत्या प्रस्तार पंक्तिः । हिरण्यवर्णामिति बीजं । तां म आवह जातवेद इति शक्तिः । कीर्तिमृद्धिंददातु मे इति कीलकं । मम श्री महालक्ष्मी प्रसादसिद्ध्यर्थे न्यासे विनियोगः ॐ श्रीं श्रीं श्रीं इति करशुद्धिः ॥

॥ अथ करन्यासाः ॥

ॐ नमो भगवत्यै महालक्ष्म्यै हिरण्यवर्णायै अंगुष्ठाभ्यां नमः
,, ,, ,, हरिण्यै तर्जनीभ्यां स्वाहा
,, ,, ,, सुवर्णरजतस्रजायै मध्यमाभ्यां वषट्
,, ,, ,, चंद्रायै अनामिकाभ्यां हूं
,, ,, ,, लक्ष्म्यै करतलकरपृष्ठाभ्यां फट्

॥ अथ हृदयादिन्यासाः ॥

ॐ नमो भगवत्यै महालक्ष्म्यै हिरण्यवर्णायै हृदयाय नमः
,, ,, ,, हरिण्यै शिरसे स्वाहा ।
,, ,, ,, सुवर्णरजतस्रजायै शिखायैवषट् ।
,, ,, ,, चंद्रायै कवचाय हूम् ।
,, ,, ,, हिरण्मय्यै नेत्रत्रयाय वौषट् ।
,, ,, ,, लक्ष्म्यै अस्त्राय फट् ।

ॐ भूर्भुवः स्वरोमिति दिग्वन्धः ।

॥ अथ पंचदश ऋग्भिः अङ्गन्यासाः ॥

ॐ हिरण्यवर्णां हरीणीं सुवर्णरजतस्रजां ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
इति नमः शिरसि ॥१॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐ तां म अवाह जातवेदो लक्ष्मीमनपगामिनीं ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहं ॥
इति नमः नेत्रयोः ॥२॥

ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥
इति नमः कर्णयोः ॥३॥

ॐ कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलंतीं ।
तृप्तां तर्पयंतीं पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥
इति नमः नासिकयोः ॥४॥

ॐ चन्द्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदारां ।
तां पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ॥
इति नमः मुखे ॥५॥

ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पति स्तव वृक्षोऽथ बिल्वः
तस्य फलानि तपसा नुदंतु मायान्तरा याश्च बाह्या अलक्ष्मीः ॥
इति नमः कण्ठे ॥६॥

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतः सुराष्ट्रेस्मिन्कीर्तिमृद्धिं ददातु मे ॥
इति नमः बाह्वोः ॥७॥

ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥
इति नमः हृदि ॥८॥

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥
इति नमः नाभौ ॥९॥

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥
इति नमः गुह्ये ॥१०॥

ॐ कर्दमेन प्रजा भूता मयि संभव कर्दम ।
श्रियं वासय मे गृहे मातरं पद्ममालिनीम् ॥
इति नमः पादयोः ॥११॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
वाचं देवीं मातरं श्रियं वासय मे कुले ॥
इति नमः उर्वोः ॥१२॥

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीम् ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
इति नमः जान्वोः ॥१३॥

ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
इति नमः जंघयोः ॥१४॥

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥
इति नमः पादयोः ॥१५॥

ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रियः पंचदशर्चं च श्रीकामः सततं जपेत् ॥
इति नमः सर्वांगे ॥१६॥

श्रीं श्रीं इति बीजाभ्यां करशुद्धिं कुर्यात् । (जलेन हस्तौ प्रक्षालयेत्)

॥ अथ प्रार्थना ॥

ॐ अश्वदायै गोदायै धनदायै महाधने ।
धनं मे लभतां देवि सर्वकामांश्च देहि मे ॥१॥

॥ अथ ध्यानम् ॥

सहस्रार्कप्रतीकाशं कंदर्पायुतसन्निभम् ।
युवानं पुंडरीकाक्षं सर्वाभरणभूषितं ॥
पीनवृत्तायुतैर्दोर्भिश्चतुर्भिर्भूषणान्वितैः ।
चक्रं शंखं गदां पद्मं बिभ्राणं पीतवाससम् ॥
शुक्लपुष्पानुलेपं च रक्तहस्तपदांबुजम् ।
सुस्निग्धनीलकुटिलकुंतलैरुपशोभितम् ॥
श्रिया भूम्या समाश्लिष्टपार्श्वं ध्यात्वा समर्चयेत् ॥
अरुणकमलसंस्था तद्रजःपुञ्जवर्णा
करकमलधृतेष्टाभीतियुग्मांबुजाता ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मणिमुकुटविचित्रालंकृतां कल्पजातै-
र्भवतु भुवनमाता संततं श्रीः श्रियै नः ॥१॥

ततः कमल कलश धेनु ज्ञानाञ्जलिमुद्राप्रदर्शनम् ॥

॥ ततः मानसोपचारैः पूजनम् ॥

लं पृथ्वी	तत्त्वात्मकं	महालक्ष्म्यै	गंधं	समर्पयामि नमः
हं आकाश	,,	,,	पुष्पं	,,
यं वायु	,,	,,	धूपं	,,
रं अग्नि	,,	,,	दीपं	,,
वं अमृत	,,	,,	नैवेद्यं	,,
शं शक्ति	,,	,,	तांबूलादि सर्वोपचारपूजां समर्पयामि नमः	

अथ बाह्यपूजनं । तत्र पूर्वं यथाविधि दीपकलश शंख घंटा पूजनम् ।

॥ अथावरणपूजनं ॥ अथ प्रथमावरणं ॥

षट्कोणयंत्रमालिख्य आग्नेयादिकोणेषु

हिरण्मयायै	श्रीं	पूजयामि
चंद्रायै	,,	,,
रजतस्रजायै	,,	,,
हिरण्यस्रजायै	,,	,,
हिरण्याक्षायै	,,	,,
हिरण्यवर्णायै	,,	,,

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनं ॥१॥

॥ अथ द्वितीयावरणं अथ पूर्वादि दलेषु ॥

पद्मायै	श्रीं	पूजयामि
पद्मवर्णायै	,,	,,
पद्मस्थायै	,,	,,
आर्द्रायै	,,	,,
तुर्यगत्यै	,,	,,
तृप्त्यै	,,	,,
ज्वलंत्यै	,,	,,
स्वर्णप्राकारायै	,,	,,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं द्वितीयावर्णार्चनं ॥२॥

॥ अथ तृतीयावरणं अथ पूर्वादिदिक्षु ॥

इंद्राय नमः। अग्नये नमः। यमाय नमः। निर्ऋतये नमः। वरुणाय नमः। वायवे नमः। सोमाय नमः। ईशानाय नमः। इति तृतीयावरणं। अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनं ॥३॥

॥ अथ चतुर्थावरणं पुनरष्टदिक्षु ॥

वं वज्राय नमः। शं शक्तये नमः। दं दंडाय ममः। खं खड्गाय नमः। पं पाशाय नमः। अं अंकुशाय नमः। गं गदायै नमः। शं शुलाय नमः। अं अब्जायै नमः। चं चक्राय नमः। इति चतुर्थावरणम्। भूपुरस्य चतुर्षु द्वारेषु प्रागादिक्रमेण द्वारपालान् पूजयेत्। श्रीं दमकाय नमः। श्रीं सलिलाय नमः। श्रीं गुग्गुळदे नमः। श्रीं कुरंटकाय नमः।

अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या समर्पयै तुभ्यं चतुर्थावरणार्चनं ॥४॥

ततः मधान देवतांगे मयूख देवता पूजनम्। श्रीं श्रियै नमः। श्रीं लक्ष्म्यै नमः। श्रीं वरदायै नमः। श्रीं विष्णु पत्न्यै नमः। श्रीं वासुदायै नमः। श्रीं हिरण्यवर्णायै नमः। श्रीस्वर्णमालिन्यै नमः। श्रीं रजतस्रजायै नमः। श्री सुवर्ण गेहायै नमः। श्रीं स्वर्ण प्राकारायै नमः। श्रीं पद्मवासिन्यै नमः। श्रीं पद्महस्तायै नमः। श्रीं पद्मप्रियायै नमः। श्रीं मुक्तालंकारायै नमः। श्रीं सूर्यायै नमः। श्रीं चंद्रायै नमः। श्रीं विल्वप्रियायै नमः। श्रीं ईश्वर्यै नमः। श्रीं भुक्त्यै नमः। श्रीं प्रभुक्त्यै नमः। श्रीं विभूत्यै नमः। श्रीं ऋद्ध्यै नमः। श्रीं समृद्ध्यै नमः। श्रीं तुष्ट्यै नमः। श्रीं पुष्ट्यै नमः। श्रीं धनदायै नमः। श्रीं धनैश्वर्यै नमः। श्रीं शुद्धायै नमः। श्रीं संभोगिन्यै नमः। श्रीं भोगदायै नमः। श्रीं धात्र्यै नमः। श्रीं विधात्र्यै नमः।

॥ अथ पंचदशोपचारपूजनं ॥

पंचदश ऋक्पूर्वकं पंचदशोपचारैः पूजयेत्

एवं आवरणसहितां देवीं पंचदश ऋक्पूर्वकं पंचदशोपचारैः पूरुषसूक्तेन श्रीसूक्तेन च पूजयेत्तद्यथा–

१ सहस्रशीर्षा—ओं हिरण्यवर्णामित्यावाहनं तत्तन्मुद्रया स्थापनं संन्निधीकरणं संरोधनं संमुखीकरणं अवगुंठनं कृत्वा योनिमुद्रां प्रदर्श्य

२ पुरुष एवे—तां म आवह इत्यासनं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

३ एतावानस्य—अश्वपूर्वां इति पाद्यं
४ त्रिपादूर्ध्व—कांसोस्मितां इति अर्घ्यं
५ ततोविराट—चंद्रांप्रभासां इति आचमनं
६ तस्माद्यज्ञा—आदित्यवर्णे इति पंचामृतस्नानं
७ तस्माद्यज्ञात्सर्व—उपैतु मां इति शुद्धजलेन स्नानं
८ तस्मादश्वा—क्षुत्पिपासा इति वस्त्रं
९ तं यज्ञं बर्हिषि—गंधद्वारां इति गंधं
१० यत्पुरुषं—मनसः काम इति भूषणं
११ ब्राह्मणोस्य—कर्दमेन इति पुष्पं
१२ चंद्रमा मनसो—आपः सृजंतु इति धूपं
१३ नाभ्या आसी—आर्द्रां पुष्करिणीं इति दीपं
१४ यत्पुरुषेण—आर्द्रां यः करिणीं इति नैवेद्यं
१५ सप्तास्या—तां म आवह इति आचमनं फलं तांबूलं दक्षिणां नीराजनं मंत्रपुष्पांजलीं प्रदक्षिणां
१६ यज्ञेन यज्ञ—यः शुचिः इति नमस्कारांश्च कृत्वा संपूज्य

॥ विष्णुस्तवः ॥

जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन ॥
नमस्तेस्तु हृषीकेश महापुरुषी पूर्वज ॥
देवानां दानवानां च सामान्यमधिदैवतम् ॥
सर्वदा चरणद्वंद्वं व्रजामि शरणं तव ॥१॥

एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा ॥
अध्यक्षश्चानुमंता च गुणमायासमावृतः ॥
संसारसागरं घोरमनन्तं क्लेशभाजनम् ॥
त्वामेव शरणं प्राप्य निस्तरंति मनीषिणः ॥२॥

नते रूपं न चाकारो नायुद्धानि न चास्पदम् ॥
तथापि पुरुषाकारो भक्तानां च प्रकाशसे ॥
नैव किंचित्परोक्षं ते प्रत्यक्षोसि न कस्यचित् ॥
नैव किंचिदसाध्यं ते नच साध्योसि कर्हिचित् ॥३॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ॥
योगिनां परमां सिद्धिं परमं ते पदं विदुः ॥
अहं भीतोस्मि देवेश संसारेस्मिन्भयावहे ॥
पाहि मां पुंडरीकाक्ष न जानामि परं पदम् ॥४॥
कालेष्वपि च सर्वेषु दिक्षु सर्वासु वाच्युत ॥
शरीरे च गतौ चास्य वर्तते मे महद्भयम् ॥५॥
त्वत्पादकमलादन्यन्न मे जन्मान्तरेष्वपि ॥
निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिम् ॥
विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानमूर्जितम् ॥
जन्मातरेपि मे देव माभूदस्य परिक्षयः ॥६॥
दुर्गतावपि जातायां त्वद्गतो मे मनोरथः ॥
यदि नाशं न विन्देत तावतास्मि कृती सदा ॥७॥
न कामकलुषं चित्तं मम ते पादयोः स्थितम् ॥
कामये विष्णुपादौ तु सर्वजन्मसु केवलम् ॥८॥
ततः ॥ भो ईश्वर क्षमस्वेति प्रार्थयेत । इति प्रार्थना
शंखमध्ये स्थितं तोयं भ्रामितं केशवोपरि ॥
अंगलग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति ॥

इति देवोपरि सजलं शंखं भ्रामयित्वा शिरस्यभ्युक्ष्य शंखं घंटां गरुडं च पूजयेदिति । ततो नैवेद्यशेषं ।

विष्वक्सेनोद्धवाक्रूराः सनकाद्या महर्षयः ॥
लक्ष्मीकान्तप्रसादं च सर्वे गृह्णन्तु वैष्णवाः ॥

विष्णु गणेभ्यो नमः । इति समर्प्य देवं क्षमापयेत् ॥

॥ तत्र मन्त्राः ॥

ॐ अयं मे हस्तो भयवानयं मे भगवत्तरः । अयं मे विश्वभेषजोयं शिवाभिमर्शनः । अयं मातायं पितायं जीवातुरागमत् । इदं तव पसर्पणं सुवन्धवे हि निरिहि । मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ आवाहनं न जानामि न जानामि तवार्चनम् । पूजां चैव न जानामि क्षम्यतां परमेश्वर ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वस्ति प्रजाभ्यः परिपालयंतां न्याय्येन मार्गेण महीं महीशाः ॥
गोब्राह्मणेभ्यः शुभमस्तु नित्यं लोकाः समस्ता सुखिनो भवन्तु ॥

काले वर्षतु पर्ज्जन्यः पृथिवी शस्यशालिनी ॥
देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः ॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥
तस्मात्कारुण्यभावेन रक्षस्व परमेश्वर ॥
मत्समो नास्ति पापिष्ठस्त्वत्समो नास्ति पापहा ॥
इति संचिन्त्य देवेश यथेच्छसि तथा कुरु ॥
भूमौ स्खलितपादानां भूमिरेवावलम्बनम् ॥
त्वयि जातापराधानां त्वमेव शरणं मम ॥
इत्यादि संप्रार्थ्य देवतीर्थं हृदूगमं पात्रान्तरेण पिबेत् ॥
कालमृत्युहरं पुण्यं ब्रह्महत्याविनाशनम् ॥
व्याधिघ्नं पुण्यदं पास्ये सुरपादावनेजनम् ॥ इति ॥

अनेन यथाशक्तिमयाकृत पूजनाख्येन कर्मणा भगवान् ॥
परमात्मा श्री परमेश्वरः प्रीयतामितीश्वरार्पणं कुर्यात् ॥
अभिषेकजलेन मार्जनम् ।
ततस्तर्पणं पुरुषसूक्त श्रीसूक्ताभ्याम् ।
पुरुषसूक्त श्रीसूक्ताभ्यां आवरण देवतानामभिः श्र्यादि द्वात्रिंशन्नामभिश्च तर्पणम् ।

॥ अथ तर्पणम् ॥

श्री सर्वनाममंत्राणां जातवेदोग्निर्ऋषिः । अनुष्टुप् छंदः । श्रीर्देवता । मम अलक्ष्मीपरिहारपूर्वकं लक्ष्मीप्राप्त्यर्थं तर्पणं करिष्ये । इति संकल्प्य ताम्रपात्रस्थपयसा सुगंधजलेन सकमल हस्ताभ्यां तर्पयेत् ।

१	श्रियै	नमस्तर्पयामि	१७	भूतिदायै	नमस्तर्पयामि
२	लक्ष्म्यै	,,	१८	ऋद्धिदायै	,,
३	महालक्ष्म्यै	,,	१९	समृद्धिदायै	,,
४	वरदायै	,,	२०	तुष्टिदायै	,,
५	विष्णुपत्न्यै	,,	२१	पुष्टिदायै	,,
६	स्वर्णमालिन्यै	,,	२२	धनदायै	,,
७	रजतस्रजायै	,,	२३	धनेश्वर्यै	,,
८	स्वर्णगेहायै	,,	२४	सुश्रद्धायै	,,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

९ स्वर्णप्राकारायै	नमस्तर्पयामि	२५ भोगिन्यै	नमस्तर्पयामि
१० पद्मरागायै	,,	२६ भोगदायै	,,
११ पद्मवासिन्यै	,,	२७ धात्र्यै	,,
१२ पद्मप्रियायै	,,	२८ विधात्र्यै	,,
१३ ऐश्वर्यायै	,,	२९ सिंधुजायै	,,
१४ मुक्तिदायै	,,	३० राजलक्ष्म्यै	,,
१५ भुक्तिदायै	,,	३१ गजांतलक्ष्म्यै	,,
१६ प्रभुक्तिदायै	,,	३२ साम्राज्यलक्ष्म्यै	,,

ततो लक्ष्मीमूर्तौ यंत्रे वा संपूज्य पंचदश ऋक्परिमितं श्रीसूक्तं एकवारं दशवारं वा जपेत् ।

जपांते

गुह्यातिगुह्यगोप्त्री त्वं ग्रहाणास्मत्कृतं जपम् ॥
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरी ॥१॥

इति देव्यै जपं समर्प्य घृतेन वा पायसेन एकावृत्तिहोमं प्रतिऋचं कुर्यात् ॥ ततः

आचमनं—इदं विष्णु ॥ वस्त्रं-तस्माद्यज्ञा ॥ आचमनं-इदंविष्णु ॥

यज्ञोपवीतं—तस्माद्यज्ञा ॥

आचमनम्—इदं विष्णु.

अलंकारं—मूलमंत्रपुटितैकैकमात्रकाक्षरैः पुष्पैर्गन्धाक्षतैर्बिल्वपत्रैस्तुलसीदलैर्वा समर्चनं वर्णमालया वा ॥

गंधम्—तं यज्ञं-गंधद्वारां.

अक्षताः—अक्षन्नमीमन्दत-मनसः कममाकू.

पुष्पम्—यत्पुरुषं-कर्दमेन प्रजा.

तुलसीदलं—इदं विष्णु.

सहस्रपुष्पाणि—पुरुषसूक्त-श्री सूक्ताभ्यां.

नमोस्त्वनंताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ॥
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥१॥

॥ अथ प्रथमांग पूजा ॥

१ श्रीं वरदलक्ष्म्यै	नमः	पादौ	पूजयामि ।
२ ,, कमलवासिन्यै	,,	गुल्फौ	,,
३ ,, पद्मालयायै	,,	जंघां	,,
४ ,, श्रियै	,,	जानुनी	,,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

५	,,	इंदिरायै	नमः	ऊरुं	पूजयामि ।
६	,,	हरिप्रियायै	,,	नाभिं	,,
७	,,	लोकधात्र्यै	,,	स्तनौ	,,
८	,,	विधात्र्यै	,,	कंठं	,,
९	,,	धात्र्यै	,,	नासां	,,
१०	,,	सरस्वत्यै	,,	मुखं	,,
११	,,	पद्मनिधानायै	,,	नेत्रे	,,
१२	,,	मंगलायै	,,	कर्णौ	,,
१३	,,	क्षीरसागरजायै	,,	ललाटं	,,
१४	,,	श्रीवरदलक्ष्म्यै	,,	शिरः	,,
१५	,,	श्रीमहालक्ष्म्यै	,,	सर्वांगं	,,

॥ अथ द्वितीयांग पूजा ॥

१	श्रीं	श्रीमहालक्ष्म्यै	श्रियै	नमः	शिरः	पूजयामि ।
२	,,	,,	लक्ष्म्यै	,,	नेत्रे	,,
३	,,	,,	वरदायै	,,	कर्णौ	,,
४	,,	,,	विष्णुपत्न्यै	,,	नासां	,,
५	,,	,,	वसुदायै	,,	मुखं	,,
६	,,	,,	हिरण्यवर्णायै	,,	गंडौ	,,
७	,,	,,	स्वर्णमालिन्यै	,,	कंठं	,,
८	,,	,,	रजतस्रजायै	,,	उपकंठं	,,
९	,,	,,	सुवर्णगृहायै	,,	दक्षबाहुं	,,
१०	,,	,,	स्वर्णप्राकारायै	,,	वामबाहुं	,,
११	,,	,,	पद्मवासिन्यै	,,	स्तनौ	,,
१२	,,	,,	पद्महस्तायै	,,	दक्षहस्तं	,,
१३	,,	,,	पद्मप्रियायै	,,	वामहस्तं	,,
१४	,,	,,	मुक्तालंकारायै	,,	हृदयं	,,
१५	,,	,,	सूर्यायै	,,	उदरं	,,
१६	,,	,,	चंद्रायै	,,	नाभिं	,,
१७	,,	,,	बिल्वप्रियायै	,,	दक्षकक्षं	,,
१८	,,	,,	ईश्वर्यै	,,	वामकक्षं	,,
१९	,,	,,	भुक्त्यै	,,	दक्षकुक्षिं	,,
२०	,,	,,	प्रभूत्यै	,,	वामकुक्षिं	,,
२१	,,	,,	विभूत्यै	,,	दक्षकटिं	,,
२२	,,	,,	ऋद्ध्यै	,,	वामकटिं	,,
२३	,,	,,	समृद्ध्यै	,,	गुह्यं	,,
२४	,,	,,	तुष्ट्यै	,,	दक्षोरुं	,,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

			नमः	वामोरुं	पूजयामि।
२५ श्रीं	श्रीमहालक्ष्म्यै	पुष्ट्यै	,,	दक्षजानुं	,,
२६ ,,	,,	धनदायै	,,	वामजानुं	,,
२७ ,,	,,	धनेश्वर्यै	,,	दक्षगुल्फं	,,
२८ ,,	,,	शुद्धायै	,,	वामगुल्फं	,,
२९ ,,	,,	संभोगिन्यै	,,	दक्षपादं	,,
३० ,,	,,	भोगदायै	,,	वामपादं	,,
३१ ,,	,,	धात्र्यै	,,	सर्वांगं	,,
३२ ,,	,,	विधात्र्यै	,,		

१ श्रीं ईश्वर्यै नमः। २ श्रीं कमलायै नमः। ३ श्रीं लक्ष्म्यै नमः। ४ श्रीं चलायै नमः। ५ श्रीं भूत्यै नमः। ६ श्रीं हरिप्रियायै नमः। ७ श्रीं पद्मायै नमः। ८ श्रीं पद्मालयायै नमः। ९ श्रीं संपदे नमः। १० श्रीं ऊर्ध्वगत्यै नमः। ११ श्रीं श्रियै नमः। १२ श्रीं पद्मधारिण्यै नमः।

॥ अथ षोडश युग्म पूजा ॥

ॐ श्रीं क्लीं अं श्री–केशवाभ्यां नमः।
,, ,, ,, आं लक्ष्मी–नारायणाभ्यां नमः।
,, ,, ,, इं कमला–माधवाभ्यां नमः।
,, ,, ,, ईं पद्मा–गोविंदाभ्यां नमः।
,, ,, ,, उं पद्मिनी–विष्णुभ्यां नमः।
,, ,, ,, ऊं कमलालया–मधुसूदनाभ्यां नमः।
,, ,, ,, ऋं रमा–त्रिविक्रमाभ्यां नमः।
,, ,, ,, ॠं वृषाकपि–वामनाभ्यां नमः।
,, ,, ,, ऌं धन्या–श्रीधराभ्यां नमः।
,, ,, ,, ॡं पृथ्वी–हृषीकेशाभ्यां नमः।
,, ,, ,, एं यज्ञा–पद्मनाभाभ्यां नमः।
,, ,, ,, ऐं इंदिरा–दामोदराभ्यां नमः।
,, ,, ,, ओं उषा–अनिरुद्धाभ्यां नमः।
,, ,, ,, औं माया–पुरुषाभ्यां नमः।
,, ,, ,, अं गिरा–संकर्षणाभ्यां नमः।
,, ,, ,, अः राधा–वासुदेवाभ्यां नमः।

ततः सगोघृतैर्बिल्वकांडैर्वा षोडशाहुतीर्हुत्वा संपूर्णस्तोत्रपाठं च कृत्वा यथाशक्ति मूलमंत्रं जपेत् ॥ होमे प्रतिमंत्रांतं स्वाहाकारं वदेत्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitization by eGangotri

॥ श्रीसूक्तम् ॥ ऋग्वेद ॥ टीका-पृ. ३१ / गुज. अनु.-पृ

ॐ हिरण्यवर्णां हरिणीं, सुवर्णरजतस्रजाम् ॥
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१॥
ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ॥
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२॥
ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ॥
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥३॥
ॐ कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४॥
ॐ चन्द्रां प्रभासां यशसा ज्वलन्तो श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ॥५॥
ओं आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ॥
तस्य फलानि तपसा नुदन्तु मा यान्तरा याश्च बाह्या अलक्ष्मीः॥६॥
ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह ॥
प्रादुर्भूतः सुराष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥७॥
ओं क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ॥
अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात् ॥८॥
ओं गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ॥
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्ः ॥९॥
ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि ॥
पशूनां रूपमन्यस्य मयि श्रीः श्रयतां यशः ॥१०॥
ॐ कर्दमेन प्रजा भूता मयि संभव कर्दम ॥
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११॥

सातवलेकर सं० परिशिष्टानि / ११ सूक्तम् / पृ. ६६२
सायणाचार्य-ऋ. खिलानि / पृ. ८२६

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ओं आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ॥
वाचंदेवीं मातरं श्रियं वासय मे कुले ॥१२॥
ओं आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ॥
चन्द्रां हिरणमयीं लक्ष्मीं जतवेदा म आवह ॥१३॥
ओं आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम् ॥
सूर्यां हिरण्यमयों लक्ष्मीं जातवेदा म आवह ॥१४॥
ओं तां म आवह जातवेदा लक्ष्मीमनपगामिनीम् ॥
यस्या हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम् ॥१५॥
ओं यः शुचिः प्रयतो भूत्वा जुहुयादा ज्यमन्वहम् ॥
श्रियः पञ्चदशर्चञ्च श्रीकामः सततं जपेत् ॥१६॥

सरसिजनिलये सरोजहस्ते । धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे । त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥१॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पतिर्वरुणो धनमश्विनो ॥२॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥३॥
न क्रोधो न च मात्सर्यं न लोभो नाऽशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥४॥
पद्मानने पद्मिनि पद्महस्ते पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ॥५॥
आनंदः कर्दमः श्रीदश्चिक्लीत इति विश्रुताः ॥
ऋषयस्ते त्रयः पुत्राः स्वयं श्रीरेव देवता ॥६॥
ओं महालक्ष्मीं च विद्महे विष्णुपत्नीं च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥७॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आ... ग्रन्थालय, ... वाराणसी

॥ इति मूलमत्र: श्री ग.यत्री ॥

ऋणरोगादि दारिद्र्यं पापं च अपमृत्यवः ।
भयशोकमनस्तापा नश्यन्तु मम सर्वदा ॥८॥

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥८॥

अश्वदायै गोदायै धनदायै महाधने ।
धनं मे जुषतां देवि सर्वकामार्थसिद्धये ॥१०॥

पुत्रपौत्रधन धान्यं हस्त्यश्वादिगवेरथम ।
प्रजानां भवसि माता आयुष्मन्तं करोतु माम् ॥११॥

चन्द्राभां लक्ष्मीमीशानां सूर्याभां श्रियमीश्वरीम् ।
चन्द्रसूर्याग्निवर्णाभां महलक्ष्मीमुपास्महे ॥१२॥

वर्षन्तु ते विभावरी दिवो अभ्रस्य विद्युतः ।
रोहन्तु सर्वबीजान्यव ब्रह्मद्विषो जहि ॥१३॥

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गंभिरावर्तनाभिः स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ॥
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुंभै
र्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमांगल्ययुक्ता ॥१४॥

वरांकुशापाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम् ।
बालार्ककोटिप्रतिभां त्रिनेत्रां भजेऽहमाद्यां जगदीश्वरीं ताम् ॥१५॥

ज्ञानमात्मनि भा सूर्ये चन्द्रे ज्योत्स्ना च खे ध्वनिः ।
वर्णो हिरण्ये पयसि घृतं त्वमसि मातृके ॥१६॥

हिरण्यवर्णां मणिनूपुरांघ्रिं प्रसन्नवक्त्रां शुरुपद्महस्ताम् ।
विशालनेत्रीं प्रणमामि गौरीं वाचोविदं वाचमुदीरयन्तीम् ॥१७॥

हिरण्मये सः शंभोः शक्तिः प्रोक्ता हिरण्मयी ।
धनार्थिभिरुपास्यैषा जातवेदसि सर्वदा ॥१८॥

ललिता शारदा लक्ष्मीरेकैव भगवत्युमा ।
तत्तल्लक्षणसंयुक्ता पुरुषार्थप्रदा नृणाम् ॥१९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हिरण्यं विष्णुराख्यातस्तस्य वर्णस्तु वैष्णवी ।
पिशंगधवलाभिश्च स्रग्भिरम्लानपंकजैः ॥२०॥
चतुरंगबलोपेतां धनधान्यसुखेश्वरीम् ।
अश्वारुढामहं वन्दे राजलक्ष्मीं हिरण्मयीम् ॥२१॥

वरदाभयशुकपुस्तककरकलितां कमलमध्यगां कलये ।
कमलां सस्मितवदनां कनकावरणस्थितां कांचित् ॥२२॥
आकाशपद्माकरचन्द्रबिम्ब प्लवोल्लसन्तीं परिपूर्णकान्तिम् ।
पद्मस्थितां पद्मकरां प्रपद्ये लक्ष्मीमलक्ष्मीविनिवृत्तयेऽहम् ॥२३॥
उद्यदादित्यसंकाशां बिल्वकाननमध्यगाम् ।
तनुमध्यां श्रियं ध्याये अलक्ष्मीपरिहारिणीम् ॥२४॥
कीर्तिर्मतिर्द्युतिः पुष्टिः समृद्धिस्तुष्टिरेव च ।
श्रुतिः स्मृतिर्बलं मेधा श्रद्धारोग्यजयादिकाः ॥२५॥
देवताः शक्तयः सर्वास्तत्तद्देवांशगा नृप ।
महालक्ष्मीमुपासन्ते तस्याः किंकर्य एव ताः ॥२६॥
अज्ञानपातकनमस्ततितीव्ररश्मिं दौर्भाग्यभूधरविदारणवज्रमीडे ।
रोगार्तिघोरफणिमर्दनपक्षिराजं लक्ष्मीपदद्वयमनर्थहरं सुखार्थी ॥२७॥
खड्गं सवातचक्रं च कमलं वरमेव च ।
करैश्चतुर्भिर्बिभ्राणां ध्याये चंद्राननां श्रियम् ॥२८॥
राजराजेश्वरीं लक्ष्मीं वरदां मणिमालिनीम् ।
देवीं देवप्रियां कीर्तिं वन्दे काम्यार्थसिद्धिदाम् ॥२९॥
ध्याये लक्ष्मीं प्रहसितमुखीं राजसिंहासनस्थां
मुद्राशक्ति सकलविनुतां सर्वसंसेव्यमानाम् ।
अग्नौ पूज्यामखिलजननीं हेमवर्णां हिरण्यां
भाग्योपेतां भुवनसुखदां भार्गवीं भूतधात्रीम् ॥३०॥
सिद्धलक्ष्मीर्मोक्षलक्ष्मीर्जयलक्ष्मीः सरस्वती ।
श्रीलक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना मम सर्वदा ॥३१॥
सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यंबके गौरी नारायणि नमोऽस्तुते ॥३२॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरंगधामेश्वरीं
दासीभूतसमस्तदेववनितां त्रैलोक्यदीपांकुराम् ।
श्रीमन्मंदकटाक्षलब्धविभवब्रह्मेन्द्रगंगाधरां
त्वां त्रैलोक्यकुटुंबिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥३३॥

देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥३४॥

दुर्गे स्मृता हरसि भीतिमशेषजंतोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्य दुःख भयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ॥ ३५ ॥

॥ अथ श्रीसूक्त पुरश्चरण विधिः ॥

॥ श्री सूक्तस्य यंत्रम् ॥

विंदु । तदुपरि षट्कोणं ततोवृत्तं तद्बाह्येऽष्टदलं तद्बाह्ये भूपुरं चतुर्द्वारयुतम् ।

यंत्र मध्ये लेखीनीय वर्णाः । विंदु मध्ये श्रीवीजं साध्यादिकं च तन्मध्ये । षट्कोणे अग्नीशासुरवायव्येषु मध्ये चतुर्दिक्षु च हृदयादि षडंगवीजानि । अष्ट दले काद्यष्टवर्गाः । केसरेषु स्वराः षोडश । भूपुरे दिक्पालबीजानि तत्तदायुध वीजानि । चतुर्द्वारेषु द्वादपाल वीजानि ।

पूजने पीठपूजायां आधारशक्त्यादि पीठशक्त्यंतं विभूत्यादिकाः ॥ बिभूतिः । उन्नतिः । कांतिः । हृष्टिः । किर्तिः । सन्नतिः । व्यष्टिः । उत्कृष्टिः । ऋद्धिः ।

तत्र शुभे मासि शुक्लप्रतिपदमारभ्यैकादशी पर्यंतम् । द्वादश सहस्रं जपः । द्वादश्यां १२ शतं होमः । तद्यथा ३०० आहुतयः कमलानां । ३०० आहुतयः विल्वसमिधां । ३०० पायसस्य त्रिमध्वक्तस्य । ३०० आज्यस्य श्री सूक्तस्य १२० तर्पणं । १२ मार्जनं । ब्राह्मण भोजनं १२ । एवं आहुः श्रीमच्छंकराचार्यपादाः ।

गोडाचार्यास्तु । शुक्लप्रतिपदमारभ्य शुक्लाष्टमीपर्यंतं प्रत्यहं ७५ कृत्वा श्रीसूक्त जपः । नवमी दशम्योस्तु ६७ । एकादश्यां ६६ । द्वादश्यां होमः ८० कृत्वा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ पुरश्चरणं ॥

जपात्मकं । होमात्मकं । तर्पणात्मकं । मार्जनात्मकं । अभिषेकात्मकं । ब्राह्मणभोजनात्मकं । पूजनात्मकं । पुष्पसमर्पणात्मकं । स्तुतिपाठात्मकं । फलनिवेदनात्मकं । पत्रसमर्चनात्मकं । धान्यसमर्चनात्मकं वापि भवति ।

॥ इति पुरश्चरणं ॥

॥ श्रीसूक्त होम प्रयोगः ॥

आचम्य प्राणनायम्य संकल्प्य । मम गृहे पंचसूना जनितदोषपरिहार-पूर्वकं दशविधलक्ष्मीप्राप्त्यर्थं प्राप्तलक्ष्मीस्थिरीकरणार्थमलक्ष्मीनाशनार्थं शाकलतंत्रोक्त पंचमहा यज्ञसमवेतं पुरुषसूक्त श्रीसूक्त होममग्न्युपस्थानं पुरुषसूक्तपूर्वकश्रीसूक्त-जपः । आयुष्करणं क्षमापनं विसर्जनं कर्मार्पणं च करिष्ये ।

(१) पंचभू संस्काराः । १ परिसमूहनम् २ उपलेखनम् ३ उल्लेखनम् ४ उद्धरणम् ५ अभ्युक्षणम् ।

(२) अग्न्याहरणम् । अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः । अनुसूर्यस्य पुरुत्राच रश्मीन् द्यावापृथिवी ऽ आततन्थ ।

(३) प्रतिष्ठापनम् । पृष्टादिवि पृष्टोऽग्निः पृथिव्यां पृष्टो विश्वाऽओषधीरा-विवेश । वैश्वानरः सहसा पृष्टो अग्निः सनो दिवासरिषस्पातुनक्तम् ।

(४) उपस्थानम् । (१) समितᳫं संकल्पेथाᳫं सम्प्रियो रोचिष्णू सुमनस्यमानौ इषमूर्जमभिसंवसानौ ।

(२) संवा मनाँसि संव्रता समुचित्तान्याकरम् । अग्नेपुरिष्याधिपाम भवत्वंन इष मूर्जं यजमानाय धेहि ।

(५) समिन्धनम् । १ ॐ भूर्भुवः स्वः । २ ताᳫं सवितुर्वरेण्यस्य चित्रामहं वृणे सुमतिं विश्वजन्याम् । यामस्य कण्वो अदुहत् प्रपीनाᳫं सहस्रधारां पयसा महीं गाम् । ३ तत्सवितुर्वरेण्य भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । ४ विश्वानि देव सवितर्दुरितानि परासुव यद्भद्रं तन्न आसुव ।

(६) पुनः संधानाहुतिः । मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोतु अरिष्टं यज्ञᳫं समिमं दधातु । विश्वेदेवास इहमादयन्ता मो ३ म्प्रतिष्ठ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्नाय-ग्रन्थालय, ... करौली

(७) अग्निस्थापनम् । अग्निं प्रणयामि मनसा शिवेनायमस्तु संगमनो वसूनां मानोहिꣳसीः स्थविरं माकुमारं शंनोभव द्विपदेशं चतुष्पदो ।

(८) ध्यानम् । चत्वारि शृंगा त्रयो यस्य पादा द्वेशीर्षे सप्तहस्तासो अस्य । त्रिधाबद्धो वृषभो रोरवीति महोदेवो मर्त्याꣳ आविवेश ।

(९) पूजनम् । पावक नाम्ने वैश्वानराय इदमत्र चंदनं च पुष्पं पात्रासादनादि समिद्धो मां तं यथाशास्त्रं निर्वर्त्य ।

(१०) पर्युक्षणं ।

(११) पूर्वांगहोमः । संराधनीय होमः । यावनोदेवास्त्वयि जतवेदास्तिर्यञ्चो घ्नन्ति पुरुषस्य कामान् । तेभ्योऽहं भागधेयं जुहोमि तेमा तृप्ताः सर्वैः कामैः समर्थयन्तु स्वाहा । यातिरश्ची निपद्यतेऽहं विधरणी इति । तां त्वा घृतस्य धारया यजेसꣳ राधनीमहꣳ स्वाहा ।

आधारौ आज्यभागौ हुत्वा नवाहुतिहोमं च कृत्वा ।

(१२) वैश्वदेव होमः ।

(१) व्याहृति होमः ।

१ भूः स्वाहा । २ भुवः स्वाहा । ३ स्वः स्वाहा । ४ भूर्भुवः स्वः स्वाहा ।

(२) शामक होमः ।

१ देवकृतस्यैनसो वयजनमसि स्वाहा ।
२ मनुष्यकृतस्यैनसो वयजनमसि स्वाहा ।
३ पितृकृतस्यैनसो वयजनमसि स्वाहा ।
४ आत्मकृतस्यैनसो वयजनमसि स्वाहा ।
५ एनस एनसो वयजनमसि स्वाहा ।
६ यच्चाहमेनो विद्वांश्चकार यच्चाविद्वांस्तस्य सर्वस्यैनसो वयजनमसि स्वाहा ।
७ प्रजापतये स्वाहा ।

(३) स्मार्त होमः ।

१ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिपतिꣳ हवामहे वसोमम । आहमजानिगर्भधमात्वजासिगर्भधम् । इति मंत्रेण चतस्र आहुतयः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

२ ॐत्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम् उर्वारुकमिव बंधनान् मृत्योर्मुक्षीय मामृतात्। त्र्यंबकं यजामहे सुगंधिं पतिवेदनम्। उर्वारुकमिव बंधनादितो मुक्षीय मामृतात्। इतित्रेण आहुती द्वे।

(१३) प्रधान होमः।

१ पुरुष सूक्तम्।

श्रीसूक्तम्। यथोदेशं। हिरण्यवर्णां इति मंत्रेण १०८ अन्नेन जुहुयात्। अंगपूजा आवरणानि वा कांसोस्मितां इति मंत्रेण ११ आज्येन जुहुयात्।

(१४) उपांगहोमः।

(१) राष्ट्रभृत् होमः।

१ ऋताषाड्ऋतधमाग्निर्गन्धर्वः सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहावाट्।

२ ऋताषाड्ऋतधामाग्निर्गन्धर्वस्तस्यौषधयोप्सरसोमुदो नाम ताभ्यः स्वाहा।

३ सꣳहितो विश्वसामा सूर्यो गंधर्वः सनइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहावाट्।

४ सꣳहितो विश्वसामा सूर्यो गंधर्वस्तस्यमरीचयोऽप्सरस आयुवो नाम ताभ्यः स्वाहा।

५ सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वः सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहावाट्।

६ सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा।

७ इषिरो विश्वव्यचा वातो गंधर्वः सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहावाट्।

८ इषिरो विश्वव्यचा वातो गंधर्वस्तस्यापोप्सरस ऊर्जो नाम ताभ्यः स्वाहा।

९ भुज्युः सुपर्णो यज्ञो गंधर्वः सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहावाट्।

१० भुज्युः सुपर्णो यज्ञो गंधर्वस्तस्य दक्षिणा अप्सरसस्तावा नाम ताभ्यः स्वाहा।

११ प्रजापतिर्विश्वकर्मा मनो गंधर्वः सन इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहावाट्।

१२ प्रजापतिर्विश्वकर्मा मनो गंधर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा।

(२) जयाख्य होमः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१ चित्तं च स्वाहा। २ चित्तिश्च स्वाहा। ३ आकूतं च स्वाहा। ४ आकूतिश्च स्वाहा। ५ विज्ञातं च स्वाहा। ६ विज्ञातिश्च स्वाहा। ७ मनश्च स्वाहा। ८ शक्वरीश्च स्वाहा। ९ दर्शश्च स्वाहा। १० पौर्णमासं च स्वाहा। ११। बृहच्च स्वाहा १२। रथंतरं च स्वाहा १३। प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतना जयेषु। तस्मै विशः समनमंतपूर्वैरियमुग्रो विहव्यो यथासत् स्वाहा।

(३) अभ्यातान होमः।

१ अग्नि र्भूतानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां ँ स्वाहा।

२ इंद्रो जेष्ठानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ँ स्वाहा।

३ यमः पृथिव्या अधिपतिः समावत्वस्मिन ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ँ स्वाहा।

४ वायुरंतरिक्षस्याधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुपुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ँ स्वाहा।

५ सूर्योदिवोधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां ँ स्वाहा।

६ चन्द्रमा नक्षत्राणामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां ँ स्वाहा।

७ बृहस्पतिर्ब्रह्मणोधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां ँ स्वाहा।

८ मित्रः सत्यानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ँ स्वाहा।

९ वरुणोऽऽपामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां ँ स्वाहा।

१० समुद्रः स्रोतानामधिपतिः समावत्यस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां ँ देवहूत्या ँ स्वाहा।

११ अन्नँ साम्राज्यानामाधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्याँ स्वाहा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

१२ सोम ओषधीनामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या९ स्वाहा ।

१३ सविता प्रसवानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ९ स्वाहा ।

१४ रुद्रः पशूनामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ९ स्वाहा ।

१५ त्वष्टा रूपाणामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ९ स्वाहा ।

१६ विष्णुः पर्वतानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्यां ९ स्वाहा ।

१७ मरुतो गणनामधिपतयस्तेसमावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ९ स्वाहा ।

१८ पितरः पितामहाः परेवरेततास्ततामहा इहमावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मण्यस्यां देवहूत्या ९ स्वाहा ।

(४) वातहोमः ।

१ समुद्रोसि नभस्वानार्द्रदानुः शंभूर्मयोभूरभिमावाहि स्वाहा ।

२ मारुतोसि मरुतांगणः शंभूर्मयोभूरभिमावाहि स्वाहा ।

३ अवस्यूरसि दुवस्वान् शंभूर्मयोभूरभिमावाहि स्वाहा ।

(५) रुक्मती होमः ।

१ यास्ते अग्ने सूर्येरुचो दिवमातन्वति रश्मिभिः ताभिर्नोअद्य सर्वाभी रुचे जनाय नस्कृधि ।

२ यावोदेवाः सूर्य्येरुचो गोष्वश्वेषु यारुचः । इंद्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते ।

३ रुचंनोधेहि ब्रह्मणेपुरुप ९ राजसुनस्कृधि । रुचं विश्येषु शूद्रेषु मयि धेहि रुचारुचम् ।

४ स्वर्णघर्मः स्वाहा । ५ स्वर्णार्कः स्वाहा । ६ स्वर्णशुक्रः स्वाहा । ७ स्वर्णज्योतिः स्वाहा । ८ स्वर्णसूर्यः स्वाहा । ९ तत्वायामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेहवोद्ध्युरुश ९ समानऽआयुः प्रमोषीः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्नाय-ग्रन्थालय, भरतनिधि, करौंदी वाराणसी-५

(६) वैमृधहोमः ।

१ वार्त्रहत्याय शवसे पृतनाषाह्यायच । इन्द्रत्वा वर्तयामसि ।

२ सहदानुं पुरुहूतक्षियन्तमहस्तमिन्द्र सम्पिणक्कुणारुम् । अभिवृत्रं वर्धमानं पियारुमपादमिन्द्र तव साजघन्थ ।

३ विन इन्द्रमृधो जहिनीचायच्छ पृतन्यतः । यो ऽअस्माँऽअभिदासत्य-धरंगमया तमः ।

४ मृगोनभीमः कुचरोगिरिष्ठाः परावत्तऽआजगन्था परस्याः । सृक ँ स ँ शाय पविमिंद्र तिग्मँ विशत्रून् ताड्ढीविमृधोनुदस्व ।

५ वैश्वानरो न ऊतय आमयातुपरावतः । अग्निरुक्थेन वाहसा । उपयाम गृहीतोसि वैश्वानराय त्त्वेष ते योनिर्वैश्वानराय त्त्वा ।

६ पृष्ठो दिवि पृष्ठो अग्निः पृथिव्यां पृष्ठो विश्वा ओषधीराविवेश । वैश्वानरः सहसा पृष्ठो अग्निः सनो दिवासरिषस्पातु नक्तम् ।

७ अश्यामतं काममग्ने तवोती अश्यामरयि ँ रयिवः सुवीरम् । अश्याम वाजमभिवाजयन्तो श्यामद् द्युम्नमजराजरंते ।

८ कर्मसंपूरकाहूतिः । तद्विष्णोः परमम्पद ँ सदा पश्यन्ति सूरयः । दिवीवचक्षुराततम् ।

९ कर्म शेषाहूतिः । अग्नये स्विष्टकृते स्वाहा ।

(१५) उत्तरांग होमः ।

(१) भूः स्वाहा । २ भुवः स्वाहा । ३ स्वः स्वाहा । ४ भूर्भुवः स्वः स्वाहा । ५ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषा ँ सि प्रमुमुग्ध्यस्मत् ।

६ सत्वन्नो अग्नेवमो भवोती नेदिष्ठो अस्याउषसोव्युष्टौ । अवयक्ष्वनो वरुण ँ रराणो वीहिमृडीक ँ सुहवो न एधि ।

७ अयाश्चाग्न्यस्यनभिशस्तिपाश्च सत्यमित्त्वया असि । अयान्नो यज्ञं वहास्ययानो धेहि भेषजम् ।

८ येते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः ।

९ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यम ँ श्रथाय । अथावयमादित्यव्रते तवानागसो अदितये स्याम ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(२) कामपूरकाहुतिः ।

१ प्रजापतेनत्वदेतान्यन्यो विश्वारूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु । वय ँ स्याम पतयोरयीणाम् (पूर्णाहुतेः पूर्वं वा बलिहरणम्) ।

(३) पूर्णाहुतिः ।

१ सप्तते अग्ने समिधः सप्तजिह्वाः सप्तऋषयः सप्तधामप्रियाणि । सप्तहोत्राः सप्तधात्वा यजन्ति सप्तयोनीरापृणस्व घृतेन स्वाहा ।

२ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् । कवि ँ सम्राजमतिथिं जनानामासन्ना पात्रंजनयन्तदेवाः। पुरुषसूक्तं श्रीसूक्तंच।

(४) वसोर्धारा ।

१ शुक्रज्योतिश्चेत्यादि मंत्राः । ॥ यजुः अ १७ मं ८० ॥ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः घृतेन त्वंतन्वंवर्धयस्व सत्याः सन्तु यजमानस्य कामाः ।

(५) बलिहरणम् ।

१ वैश्वेदेवांगभूत बलिहरणम् ।

१ धात्रे नमः २ विधात्रे नमः ३ विश्वेभ्यो देवेभ्यो नमः ।

२ श्रीसूक्ताराधनांग भूतं बलिहरणम् ।

१ श्रीं श्रियै नमः २ श्रीं लक्ष्म्यै नमः ३ श्रीं वरदायै नमः ४ श्रीं विष्णुपत्न्यै नमः ५ श्रीं वसुप्रदायै नमः ६ श्रीं हिरण्यरूपायै नमः ७ श्रीं स्वर्णमालिन्यै नमः ८ श्रीं रजतस्रजायै नमः ९ श्रीं सुवर्ण गृहायै नमः १० श्रीं सुवर्ण प्राकारायै नमः ११ श्रीं पद्मवासिन्यै नमः १२ श्रीं पद्महस्तायै नमः १३ श्रीं पद्मप्रियायै नमः १४ श्रीं मुक्तालंकारायै नमः १५ श्रीं सूर्यायै नमः १६ श्रीं चंद्रायै नमः १७ श्रीं बिल्वप्रियायै नमः १८ श्रीं ईश्वर्यै नमः १९ श्रीं भुक्त्यै नमः २० श्रीं प्रभुक्त्यै नमः २१ श्रीं विभूत्यै नमः २२ ऋद्ध्यै नमः २३ श्रीं समृद्ध्यै नमः २४ श्रीं तुष्ट्यै नमः २५ श्रीं पुष्ट्यै ननः २६ श्रीं धनदायै नमः २७ श्रीं धनेश्वर्यै नमः २८ श्रीं शुद्धायै नमः २९ श्रीं संभोगिन्यै नमः ३० श्रीं भोगदायै नमः ३१ श्रीं धात्र्यै नमः ३२ श्रीं विधात्र्यै नमः

श्रिय आराधनांगभूतद्वारपालबलिः

१ श्रीं दमकाय नमः । २ श्रीं सलिलाय नमः । ३ गुग्गुलवे नमः । ४ श्रीं कुरंटकाय नमः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्नाय-ग्रन्थालय, भरतनिधि, करौंदी वाराणसी-5

वैश्वदेवशेषः

१ सर्वेभ्यो भूतेभ्यो नमः । २ भूतानां च पतये नमः । ३ सनकादि मनुष्येभ्यो हंत । ४ पितृभ्यः स्वधा । ५ यक्ष्मैतत्ते निर्णेजनम् । ६ गोभ्यो नमः । ७ अश्वेभ्यो नमः । ८ वायसेभ्यो नमः । पिपीलिकादिभ्यो नमः । १० अतिथये नमः ।

उपस्थानम् ।

श्रीसूक्तपुरुषसूक्ताभ्याम् ।

त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ।

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसो जायतांमाराष्ट्रेराजन्यः शूर इषव्योतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरंधिर्योषा जिष्णूरथेष्ठाः संभेयोयुवास्ययजमानस्य वीरोजायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यंतां योगक्षेमो नः कल्पताम् ॥

अहाव्यग्ने हविरास्येतेस्त्रचीव घृतं चम्वीव सोमः । वाजसनि ँ रयिमस्मेसुवीरं प्रशस्तं धेही यशसं बृहन्तम् ॥

अग्निर्देवता वातो देवता सूर्यो देवता चंद्रमा देवता वसवो देवता रुद्रा देवता आदित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवता इंद्रो देवता वरुणो देवता ॥

इदं हविः प्रजननं मे अस्तु दशवीर ँ सर्वगण ँ स्वस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि । अग्निः प्रजां बहुलां मे करोत्वन्नं पयोरेतो अस्मासुधत्त ॥

विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रंतन्न आसुव ॥

जातवेद सेसुनवामसोममरातीयतो निदहाति वेदः । सनः पर्षदतिदुर्गाणि विश्वानावेव सिंधुं दुरितात्यग्निः ॥

अग्नेनय सुपथारायेे अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठांते नमउक्तिं विधेम स्वाहा ॥

सहनानवतु सहनौ भुनक्तु सहवीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ॥

वार्त्रहत्याय शवसे० । सहदानुं पुरुहुतः० । विनइंद्र० । मृगोनभीम० । वैश्वानरोन० । पृष्टोदिवि० । अश्यामंत० ॥

वर्यंते अधरमिमाहिक्कामघुत्तानहस्तानमसोपसद्य । यजिष्ठेन मनसा यक्षि देवानस्त्रे-धतामन्मना विप्रो अग्ने ॥

धामच्छदग्निरिंद्रो ब्रह्मा देवो बृहस्पतिः । सचेतसो विश्वेदेवा यज्ञं प्रावन्तु नःशु भे ॥

त्वं यविष्ठदाशुषो नॄँःपाहि शृणुधीगिरः । रक्षातोकमुतत्मना ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सप्तते अग्ने समिधः सप्त जिह्वाः सप्तऋषयः सप्तधामप्रियाणि । सप्तहोत्राः सप्तधा त्वा यजन्ति सप्तयोनीरापृणस्व घृतेन स्वाहा ॥

शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिमाँश्च । शुक्रश्च ऋतपाश्चात्य-ꣳ हाः ॥

ईदृङ्चान्यादृङ्च सदृङ्च प्रतिसदृङ्च । मितश्च संमितश्च सभराः ॥

ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च । धर्ता च विधर्ता च विधारयः ॥

ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च । अन्तिमित्रश्च दूरे अमित्रश्च गणः ॥

ईदृक्षास एतादृक्षास ऊषुणः सदृक्षासः प्रतिदृक्षास एतन । मितासश्च सम्मितासोनो अद्य सभरसो मरुतो यज्ञे अस्मिन् ॥

स्वतवाश्च प्रघासीच सान्तपनश्च गृहमेधीच । क्रीडीच शाकीचोज्जेषी ॥

उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च । सासह्वांश्चाभियुग्वाच विक्षिपः स्वाहा ॥

इंद्रं दैवीर्विशो मरुतोनुवर्त्मानोभवन्यथेन्द्रं दैवीर्विशो मरुतानुवर्त्मानोभवन् । एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥ पुनस्त्वादित्या० यजुः अ० १२–४४ ॥

॥ वाजश्चमे इत्यादि मंत्राः ॥

॥ ततो जपः । पुरुषसूक्तस्य श्रीसूक्तस्य च ॥

त्र्यायुष्करणम् । त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम् ॥ क्षमापनम् । स्वरेण वर्णेन च यद्विहीनं तथैव हीनं कृपयापि यच्च ॥ तदस्तु चाग्ने परिपूर्णमेतत् तव प्रसादाद्धुतभुक् क्षमस्व । सदसस्पतिमिति प्रदक्षिणा ।

॥ स्तोत्रपाठः ॥

॥ अग्निविसर्जनम् ॥

१ यज्ञयज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा । एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तञ्जुषस्व स्वाहा ॥

२ देवागातु विदोगातुं वित्वा गातुमित । मनसस्पत इमं देव यज्ञ ꣳ स्वाहा वातो धाः ।

३ अयंते योनिर्ऋत्वियो यतो जातो अरोचथाः । तंजानन्नग्न आरोहाथानोवर्धयारयिम् ।

४ नमो महद्भ्यो० । ५ नमो ब्रह्मणे० । ६ तच्छंयोरावृणीमहे० ।

७ गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ।

॥ ततः कर्मसमर्पणम् ॥

॥ इति होमविधिः ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ अथ राजवैद्य विरचिता ॥

॥ श्री प्रसादिनी टीका ॥

नत्वा गणनाथमुमामहेश्वरौ श्रीसरस्वतीं देवीम् ॥
श्रीविष्णू श्रीसूक्तव्याख्यां वै श्रीप्रसादिनीं सरलाम् ॥१॥
गोंडलवसतिर्व्यासः शास्त्रीमां जीवरामाख्यः ॥
श्री कालीदासतनयः कुर्वे सौराष्ट्रमंडले निवसन् ॥२॥

हिरण्यवर्णां० ॥ १ ॥

हे जातवेदः जातप्रज्ञ, विश्वस्य प्रज्ञारूप हे अग्ने हे यज्ञनारायण भगवन् हिरण्यवर्णां सुवर्ण इव वर्णः कांतिर्यस्यास्तां, सुवर्णसदृशस्वरूपवतीं सुवर्णसदृशकांतिम् । हरिणीं हरिद्राचूर्णैकृतमूर्तिम् हरिणीरूपधरां । श्रीर्धृत्वा हरिणीरूपमरण्ये संचचारहेति वचनात् । सुवर्णरजतस्रजां- सुवर्णसदृशवर्णानां रौप्यसदृशवर्णानां कमलपुष्पाणां मालाधारिणीं, सुवर्णरौप्यकृतालंकारधारिणीं, सुवर्णरौप्यकृतहाराद्याभूषितां । चंद्रां चंद्रावतारां चंद्ररूपेण प्रकाशमानां चंद्रवद् भासमानां चंद्ररूपेण विश्वमाह्लादयन्तीं जीवयन्तीं । हिरण्मयीं सुवर्णस्वरूपां सुवर्ण एव विग्रहं यस्यास्तां । एवंरूपां लक्ष्मीं लाभप्रदां शुभलक्षणां श्रीदेवीं विश्वस्य मातरं भुवनेश्वरीं देवीं मे मह्यं मदर्थं मदुद्धारार्थम् वरप्रदानाय वा त्वं हे अग्निदेव आवह आह्वय आकारय मम गृहे निवासार्थम् मत्समीपं आनय । अग्नेर्देवहोत्रत्वादाह्वानं तदधीनमेव ।

हरिणीं तु हरेः पत्नीं दारिद्र्यपरिहारिणीम् । प्रपद्येहं हरिद्राभां हरिणाक्षीं हिरण्मयीम् ॥ १ ॥

तां म आवह० ॥ २ ॥

हे जातवेदः हे वेदस्वरूपाग्ने अनपगामिनीं अपगमनरहितां चांचल्यरहितां अनपायिनीं स्थिरां तां वक्ष्यमाणस्वरूपां लक्ष्मीं श्रीदेवीं मे मम मद्गृहे निवासय आवह आह्वय आकारय । यस्यां लक्ष्म्यां श्रीदेव्यां आवाहितायामाहूतायां ततश्च मद्गृहे स्थिरीभूतायां सत्यां हिरण्यं सुवर्णं गां धेनुं अश्वं पुरुषान् पुत्रकलत्रदासीदासभृत्यसुहृत्संबंधिरूपान् अहं विन्देयं प्राप्नुयां ॥ २ ॥

अश्वपूर्वां० ॥ ३ ॥

अश्वाः पूर्वे पुरोगाः यस्यास्ताम् । रथा मध्ये यस्यास्ताम् । हस्तिनां गजानां नादेन गजतुर्यादिनादेन बृंहितेन कृत्स्नदिग्व्यापिना ध्वनितां प्रबोधिनीं प्रकृष्टेन ज्ञापयित्रीं ज्ञापिकां । देवीं क्रीडादिलक्षणशीलां द्योतनशीलां, श्रियं श्रयणीयां सेनारूपां मातरं उपह्वये मत्समीपं आगच्छ इति प्रार्थये । आगन्तु प्रार्थिता च सा श्रीरूपिणी देवी मा मां जुषतां सेवताम् मेऽभिलषितानि पूरयतु ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कां सोस्मितां० ॥ ४ ॥

सोस्मितां, आ उ × ओ, ओ स्मितेन सहितां सोस्मितां आ आसंमतान्मुख-कमलं व्याप्य उ उद्गतं यत् स्मितं मंदहास्यं तेन सहिताम् । ओ इत्याश्चर्येण भक्तैर्हृदि धारितां । हिरण्यप्राकारां सुवर्णस्य दुर्गेणावृतमंदिरां । आर्द्रां जलरूपां विश्वस्य जीवनाधारां चन्द्रगुणां औषधीरूपां क्षीरोदधेरुत्पन्नत्वात् रुद्रस्वरूपां वा । आर्द्रया रुद्र इत्यादौ तथा दर्शनात् । आर्द्रां दयार्द्रहृदयां भक्तानामल्पसेवया सत्वरं बहुफलदायिनीं कोमलस्वभावां स्नेहपूर्णहृदयां वा । ज्वलंतीं ज्योतिः स्वरूपां विश्वं प्रकाशयन्तीं प्रकाशमानां स्वभक्तानां शत्रूंस्तापयन्तीं दहन्तीं । तृप्तां पूर्णमनोरथां सदा संतुष्टां । तर्पयन्तीं वरप्रदानदारिद्र्यनाशनातुलितैश्वर्यप्रदानादिभिः स्वभक्तानां मनोरथपूर्तिकारिणीं, विविधभोगवैभवप्रदानैः स्वभक्तान् पूर्णमनोरथान् कुर्वन्तीं तोषयंतीम् । पद्मे स्थितां कमले कमलासने आसीनां । पद्मवर्णां सुवर्णकमलकांति तादृशीं विविधैश्वर्यगुणसम्पन्नां । कां वाणीस्वरूपां वाङ्मनसोरगोचरां दुर्निरूप्यस्वरूपां ब्रह्मादिदेवैरप्यनिर्वचनीयस्वरूपां ब्रह्मरूपां श्रियं श्रीदेवीं मातरं उपह्वये मद्गृहे निवसितुं आवहनं करोमि ॥ ४ ॥

चंद्रां प्रभासां० ॥ ५ ॥

चन्द्रां चन्द्रवत् अमृतवर्षिणीं जीवनदात्रीं आह्लादयन्तीं । प्रभासां प्रकृष्टा भाला तेजः प्रकाशः कांतिर्यस्यास्तां दिव्यप्रभां दिव्यप्रकाशां सूर्यचंद्रादीन्प्रकाशयन्तीं दिव्यज्ञाने-नभक्तानां हृदयादज्ञानादिदोषान् परिहरन्तीं विश्वं भासयंतीं । लोके यशसा ज्वलन्तीं चतुर्दशसु लोकेषु ऐश्वर्यसमृद्धिभक्तवरप्रदानादिना प्रकाशमानां गीयमानकीर्तिम् । अत एव देवजुष्टां इन्द्रादिदेवगणैः सेवितां ब्रह्मादिदेवगणशिरश्छत्ररूपां । उदारां भक्तानां अल्पसेवया महाफलदात्रीं दारिद्र्यादिदुःखहारिणीं वदान्यां प्रगल्भां तां एवंविधैः उक्तैः अन्यैश्च विविधगुणैः सम्पन्नां । पद्मिनीमीं पद्मिनीं पद्मलतारूपां पद्मधारिणीं पद्मासनाऽऽसीनां ई ईकारवाच्यां ई स्वरूपां श्रियं श्रीदेवीं अहं शरणं प्रपद्ये शरणं प्रपन्नोस्मि । अतो मे मम अलक्ष्मी दारिद्र्यादिदुःखानि नश्यतां नाशं प्राप्नोतु इति इमं वरं हे मातः त्वां लक्ष्मीं श्रियं वृणे तव सकाशात् याचे ।.५॥

आदित्यवर्णे० ॥ ६ ॥

हे आदित्यवर्णे आदित्यस्य सूर्यस्य वर्णः प्रकाश इव वर्णो यस्यास्तस्याः संबोधनं । हे मातः तव तपसः तपःप्रभावात् वनस्पतिः बिल्वः वृक्षः अधिजातः उत्पन्नोऽभवत् प्रादुर्भूतोस्ति । कात्यायन्याः शमी जाता बिल्वो लक्ष्म्याः करेऽभवत् इति वामन पुराणात् । अथाऽनंतरं बिल्ववृक्षो तव तपसा जातः एतस्मात् कारणात् तस्य विल्ववृक्षस्य फलानि पक्वशलाटुकानि तपसा फलकृतस्तुतिपाठहोमादिप्रयोग-रूपतपसा जातेन तवानुग्रहेण मा मां प्रति अन्तरा अंतरिंद्रियसंबंधिनो या माया मम लोभमोहमात्सर्यमनोदौर्बल्याज्ञानपापकृपणतादिरूपाः अलक्ष्मीः ऋद्धिरहितितादिदोषाः, अथवा अंतरा अंतरिन्द्रियसंबंधिनीर्माया अज्ञानं लोभमोहमदमात्सर्यदैन्यादिरूपा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अलक्ष्मीः, अथवा मायान्तरा भगवत्या मायया प्राप्ता या अलक्ष्म्यस्ताः तथा दारिद्र्यं दुःखं परपीडनं प्रतैश्वर्यप्रभावकीर्तिप्रतिभादीनां हानिः राजोन्मुखता इत्याद्या या बाह्या अलक्ष्म्यस्ताः सर्वा बिल्वफलानि नुदन्तु । अर्थात् त्वत्प्रभावोत्पन्नात्मस्वरूपबिल्ववृक्षस्त्वद्रूप एव, तत्पूजनादिना तवैव प्रत्यक्षं पूजनं भवति। तथा च बिल्ववृक्षफलानां सेवनेन होमादिना च मम दारिद्र्यादिदुःखानि नश्यन्तु ॥ ६ ॥

उपैतु ॥ ७ ॥

हे मातः देवसखः देवः महादेवः सखा मित्रं यस्य सः कुबेरः च मणिना सह कीर्तिः यशः मां उपैतु प्राप्नोतु । अथवा देवानां प्रतिवेलं रक्षयिता मित्रं महादेवः च कीर्तिः कीर्त्यभिमानिनी कीर्तिनाम्ना प्रसिद्धा कीर्तिरूपेण जगति व्याप्ता तन्नाम्नी दक्षकन्या मणिना मणिभद्रनामकेन कुबेरकोशाध्यक्षेण सह मां उपैतु उपागच्छतु प्राप्नोतु । उमामहेश्वरागमनेन तन्मित्रकुबेरस्यागमनमपि स्वतःसिद्धमेव यत्र यत्र उमामहेश्वरौ तत्र तत्र कुबेर इति शास्त्रम् । अस्मिन् सुराष्ट्रे जनपदे रैवताचल-गिरनार सोमनाथ प्रभासक्षेत्रतीर्थैः प्रसिद्धे सदा उमामहेश्वरनिवासरूपे कच्छानर्ताभिधे कुबेराद्यधिष्ठिते धर्मरूपेत्र देशे स महादेवः देवसखः कुबेरः कीर्तिर्मणिभद्रश्च सर्वे प्रादुर्भूताः सन्तः सदा निवसंति । स कुबेरः मद्राज्ये आगत्य ऋद्धिकीर्तियशऐश्वर्य-धनधान्यादीप्सितसमृद्धिं मे मह्यं ददातु प्रयच्छतु ॥ ७ ॥

क्षुत्पिपासा० ॥ ८ ॥

मम निवासस्थाने धर्मराज्ये सुराष्ट्रे महादेवस्य कुबेरस्य च प्रादुर्भावेन अहं क्षुत्पिपासामलां क्षुधातृषाभ्यां मलिनां दुःखदायिनीं । ज्येष्ठां क्षीरोदाब्धिमथनसमये लक्ष्म्याः पूर्वमुत्पन्नतया लक्ष्म्या अग्रजांपतादृशीं अलक्ष्मीं दारिद्र्यशोकदुःखात्त-वियोगाधिव्याधुपाधिरूपां महतीं सर्वप्रकारां दुःखप्रदां असंपत्तिं नाशयामि । हे कुबेर मे मम गृहात् सर्वां संपूर्णतया अभूतिमनभिवृद्धिमैश्वर्यराहित्यं, असमृद्धिं सकलभोग्यवस्तुविरहिततां निर्णुद दूरीकुरु अर्थात्—उमामहेश्वरकुबेरमणिभद्रादयो मद्गृहनिवासेन मह्यं सर्वप्रकारेण दुःखनिवारणपूर्वकं सर्वसुखानि प्रयच्छंतु ॥ ८ ॥

गंधद्वारां० ॥ ९ ॥

पृथ्वीरूपां श्रियं वर्णयति । गंधद्वारां गंधो घ्राणग्राह्यो गुणः स एव द्वारं मार्गो यस्यास्तां गंधगुणजननीं गन्धवतीं । दुराधर्षां दुःसहां केनापि धर्षितुं पराभवितुमशक्यां सहस्रशः पृथ्वीपतिभिः स्वामिति मत्वा भुक्तामपि न कस्यचिदपि जातामिति भावः । नित्यपुष्टां नित्यं सर्वदा सर्वकालं उत्पादितषड्रसरूपखाद्यपेयभोज्यादिसकलवस्तुभिः परिपूर्णां । निभृतां समृद्धां सकलैहिकामुष्मिकवैभवविलासपदार्थैः परिपूर्णामत एव भक्तादाः पूरयंतीं अत एव भक्तान्पोषयितुं समर्थां पोषयंतीं । करीषिणीं करीषं शुष्कमार्द्रं वा गोमयं तद्वतीं गोमयवतीं गोमयैरास्तृतसकलपृष्ठां गवाश्वादिपशुधनैर्व्याप्तसकल मंडलां व्याप्तदशदिग्भागां पशुधनैः समृद्धां । सर्वभूतानामीश्वरीं आधारभूतां जीवयंतीं पृथिव्युत्पन्नसर्वप्राणिनां नियामिकां प्रभुरूपां निग्रहानुग्रहसमर्थामधिष्ठात्रीमाधारभूतामेतादृशीं तां पृथ्वीरूपधारिणीं श्रियं लक्ष्मीं इह मम गृहे निवासार्थं उपह्वये आह्वये ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मनसः काम० ॥ १० ॥

मनसः कामं त्रिविधमनोरथसाफल्यं । आकूतिं इच्छारूपिणीं संसारस्य सर्वकार्यसिद्धिरूपं आशयं संकल्पं मनसो हार्दज्ञानं भक्तानां मनःसंकल्पितार्थसिद्धिं सकलजनानामंतःकरणपरीक्षाज्ञानं । वाचः सत्यं वाण्या यथार्थतां वाक्सिद्धिं । पशूनां रूपं गजाश्वगोमहिष्यादिपशूनां प्रतिपदं दर्शनप्राप्तिः अस्तित्वं विपुलतां । अन्यस्य इतरस्य पौरजानपदसमूहस्य अस्मद्भिन्नस्य कस्याप्यस्मत्संकल्पितस्य जनस्य रूपं वात्सल्यं प्रीतिं सर्वस्वार्पणरूपस्नेहं प्राप्तस्नेहेन च पौरजानपदानां सकाशाद्विविधवस्तुप्राप्तिं वयं अशीमहि लभेमही । अन्यस्य अस्मच्छत्रोर्वा रूपं श्रियं ऐश्वर्यं यशः वयं लभेमहि अर्थात् अस्मच्छत्रुर्लक्ष्मीहीनो ऐश्वर्यहीनो दुर्यशाश्च स्यात् । अस्मच्छत्रुगृहान्निर्गता सा श्रीः सुवर्णादिसमृद्धिः ऐश्वर्यं यशः सत्कीर्तिः सर्वं मयि त्वदुपासके हे मातः श्रयतां आश्रयताम् स्थिरीभवतु मदधीनं भवतु मम शत्रुः श्रीयशोविरहितो भवतु ॥ १० ॥

कर्दमेन प्रजा० ॥ ११ ॥

कर्दमेन कर्दमाख्येन श्रीपुत्रेण ऋषिणा प्रजाभूता श्रीः प्रकृष्टं जा उत्तमपुत्रवती भूता अभवद् जाता । अतः हे कर्दम श्रीपुत्र त्वं मयि संभव मद्गृहे पुत्ररूपेण अवतर मद्गृहे संवस । च जगन्मातरं पद्ममालिनीं कमलपुष्पमालाधारिणीं स्वमातरं श्रियं मे मम कुले वंशे वासय निवासय । मद्गृहे तव जन्मना निवासेन वा त्वत्पृष्ठे तव माता लक्ष्मीरपि पुत्रवात्सल्येन आगमिष्यत्येवेति भावः ॥ ११ ॥

आपः सृजन्तु० ॥ १२ ॥

आपः जलदेवताः स्निग्धानि स्नेहयुक्तानि वस्तूनि सृजन्तु उत्पादयन्तु जलदेवतास्वरूपेण वरुणस्वरूपेण ब्रह्मांडे यत्र यत्र जलतत्त्वं रसतत्त्वं वा विद्यते तत्र तत्र तद्रूपेण विद्यमाना भगवती अस्मद्गृहेऽस्मत्कुले आपः आर्द्रत्वं सुस्निग्धतां स्नेहपरिपूर्णत्वं मैत्रीं एकतां वा सृजन्तु । सुखं जिजीविषूणामस्माकं देहेषु वा स्निग्धपदार्थानां वैपुल्यं करोतु । वयं स्निग्धदृढपुष्टदेहाः भवेम । स्निग्धपदार्थानां दुग्धदधिघृतगोरसादिवस्तूनामभावोस्मद्गृहेषु मास्तु । ततश्च वयं देव पितृतिथ्यादीनां सेवया शास्त्रविहितयज्ञयागादिकर्मणा इह सुखिनोभूत्वाऽमुत्र चोत्तमलोकभाजः स्याम । हे चिक्लीत नामक श्रीपुत्र मे मम गृहे वस निवासं कुरु । न त्वमेकाकी किमुत वाचं देवीं सरस्वती स्वरूपेण त्रिलोकींव्याप्तां विश्वस्य वाणीस्वरूपेण स्थितां । नीचदेवीं एतत्पाठे नीचानां अधोगतिप्राप्तानां दारिद्र्यदुःखाभिभूतानां नीचकुलोत्पन्नानां अंत्यजानां वा भाग्योदयकरणेन उद्धारेण मंदभाग्यानां तारणेन प्रकाशितकीर्तिम् एवंगुणां स्वकीयां तव जगतश्च जननीं श्रियं लक्ष्मीं मे कुले मम वंशे वासय निवासं कारय । चिक्लीत चयति रसधनैश्वर्यादीनीति । अथवा चिनोति चिनुते अथवा ऐश्वर्यादिकं चययंति चाययतीति चिक्लीतः क्लीतं अधाष्ट्र्यं कलतीति क्लीतं अधाष्ट्र्यं अकिंचनत्वादिदुःखैरपराभवः सर्वत्राऽप्रतिहतप्रभावत्वं दंभराहित्यं सारल्यं अस्यास्तीति वा क्लीतः चिक्लीतस्तत्संबोधने ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आम्नाय-ग्रन्थालय,
भरतमिलाप, करौंदी
वाराणसी-5

आर्द्रां पुष्करिणीं० ॥ १३ ॥

आर्द्रां जलमयीं वर्षारूपिणीं प्रकृष्टजलवर्षणेन धान्यफलपुष्पाद्युत्पादनेन पङ्कसमयीं। वा दिग्गजशुंडाधृतजलकुंभैः आर्द्रां जलाक्तां रसरूपां जलरूपां वा। पुष्करिणीं पुष्करशब्दः गजशुंडाग्रवाचकः अभिषेकोद्युक्तदिग्गजशुंडाग्रैः उपरि अभिषेकार्थं दिग्गजाः उद्युक्ताः सन्तीत्यर्थः। पुष्कर- कमलपुष्पमालाधारिणीं कमलासनां वा। पुष्टिं जगति पुष्टिरूपेण संस्थितां पोषकतत्त्वेन जगद्धारिणीं। पद्ममालिनीं पद्मपुष्पमालाधारिणीं। चंद्रां चंद्ररूपां अमृतवर्षिणीं सिद्धरसादिप्रदानेन भक्तशरीराण्यमराणि मरणभयरहितानि वा कुर्वन्तीम। हिरण्मयीं भक्तानां दारिद्र्यहारिणीं सुवर्णभूषणैः सुशोभितविग्रहां सुवर्णरूपां एतादृशीं लक्ष्मीं हे जातवेदः अग्ने आवह आकारय मद्गृहे निवासय ॥ १३ ॥

आर्द्रां यः करिणीं० ॥ १४ ॥

आर्द्रां रस-जल गुणमयीं शीतलगुणां स्निग्धपदार्थमयीं घृतदुग्धादिस्निग्धपदार्थैः पूरितभक्तगृहां विपुलगोधनैः पूरितभक्तमनोरथां। यःकरिणीं यष्टिकरां वेत्रहस्तां दंडधारिणीं दुष्टानां दमनार्थं भक्तानां रक्षणाय धृतदंडां यष्टिदंडरूपां धर्मदंडस्वरूपां धर्मदंडस्वरूपिणीं। सुवर्णां अनिर्वचनीयवर्णां शोभनरूपां रूपगुणेन जगन्मोहयन्तीं अनिर्वचनीयरूपां। हेममालिनीं सुवर्णाभूषणैरलंकृतां। सूर्यां सूर्यरूपां सूर्यं प्रकाशयन्तीं सूर्यवत्प्रकाशमानां। हिरण्मयीं सुवर्णरूपेण जगद्व्यवहारकर्त्रीम् लक्ष्मीं हे जातवेदः मे मम गृहे आवह निवासय ॥ १४ ॥

तां म आवह० ॥ १५ ॥

हे जातवेदः अग्ने तां उपर्युक्तस्वरूपां अनपगामिनीं मद्गृहान्निर्गमनरहितां लक्ष्मीं श्रियं मे मम गृहे आवह चिरनिवासिनीं कुरु ॥ यस्यां लक्ष्म्यां मे गृहे निवासमानायां सत्यां अहं प्रभूतं हिरण्यं अतुलितं सुवर्णं अगणिता गा धेनूः असंख्यातदासीदासजनान् परिचारकान् अश्वान् पुरुषान् पुत्रमित्रभृत्यादीन् विन्देयं लभेयं ॥ १६ ॥

यः शुचिः प्रयतो० ॥ १६ ॥

यः श्रीकामो मनुष्यः शुचिः पवित्रः प्रयतः सावधानो स्थिरचित्तो भूत्वा संकल्पन्यासध्यानादिविधिपूर्वकं प्रत्यहं प्रतिदिनं श्रियः श्रीसूक्तस्य पंचदशर्चं पंचदशमंत्रैः प्रतिवारं आज्यं गोघृतं जुहुयात्। तथा श्रीकामः लक्ष्मीं कामयमानो जनः श्रियः पंचदशर्चं श्रीसूक्तस्य पंचदशमंत्रान् सततं जपेत् पाठं पारायणं कुर्यात्। अर्थात्- श्रीकामेन श्रीप्रसादेप्सुना ऐश्वर्यधनधान्यपशुपत्नीपतिपुत्रपरिचारकादिसुखाभिलाषिणा मनुष्येण पुरुषेण स्त्रिया वास्य श्रीसूक्तस्य पाठो जपो सबिल्वकांडेन सबिल्व फलखंडेन गोघृतेन होमो वा सततं प्रतिदिनं कार्यस्तेन सफल मनोरथो भवेत् ॥ १६ ॥

इतिश्री गोंडलनिवासिना श्रीचरणसरोरुह नतमस्तकेन राजवैद्य जीवराम कालिदासशास्त्रिणा विरचिता श्रीसूक्तस्य श्रीप्रसादिनी टीका समाप्ता ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजवैद्यकृत श्रीसूक्तनी श्रीप्रसादिनी संस्कृतटीकाने आधारे तेमणे करेलुं

श्री सूक्तनुं गुजराती भाषांतर

जेओ श्री सूक्तना १६ मंत्रोना तथा बीजा स्तुति पाठना मंत्रो अने श्लोकोना शुद्ध उच्चार न करी शकतां होय तेवां स्त्रीओ बाळको अने बीजाओयें नीचे प्रमाणेना बधा मंत्रोना अर्थनो पाठ करवाथी मंत्रोना पाठ करवा जेटलुं फळ मळे छे अने मननी अभिलाषाओ पुरी थाय छे. दरेक मंत्रनुं मथाळुं लखेल छे ते ते मंत्रना ते अर्थ समजवा.

हिरण्यवर्णा० ॥ १ ॥

जगतना ज्ञान स्वरुप एवा हेय ज्ञानारायण अग्नि भगवान्, सोनाना सरखी कांति वर्ण अने स्वरूपवाळां, हरिणीनुं रूप धारण करनारां, सोनाना अने रुपाना जेवा रंगनां कमळपुष्पोनी माळा धारण करनारां, सोना रुपानां आभूषणो हार पहेरनारां, चंद्रनी पेठे जगतने आनंद आपनारां, चंद्रना आकारहप, चंद्ररुपे प्रकाशमान, सुवर्ण जेनुं स्वरुप छे एवां, लक्ष्मीरुप अर्थात् ज्ञान ऐश्वर्य सुख आरोग्य धन धान्य अने विजय आपनारां एवां जगतनां माता स्वरुप श्री देवीने मने वरदान आपवा माटे हे अग्निदेव तमे मारी समीप लइ आवो. ॥ १ ॥

तां म आवह० ॥ २ ॥

हे जातवेदः वेदस्वरूप अग्नि भगवान्, चंचळता विनानां स्थिर एवां, उपर कहेलां गुणवाळां लक्ष्मी देवीने मारे माटे मारे घेर रहेवा माटे बोलावी आपो. जो लक्ष्मी देवी मारे घेर आवी स्थिर थाय रहे तो हुं सोनुं गाय घोडा अने स्नेही संबंधी नोकर वगेरेने तथा समृद्धिने मेळवी शकुं. ॥ २ ॥

अश्वपूर्वां० ॥ ३ ॥

भगवती श्री देवी सेना साथे क्रीडा करवा बहार निकळे छे त्यारे घोडाओ तेनी आगळ चाले छे रथो तेनी वचमां रहे छे हाथीओ नादथी दशे दिशाओने गजावी मुके छे एवी सेना स्वरुपे रहेलां एवां दिव्य तेजवाळां श्री देवीने मारी पासे बोलावुं छुं, ए श्री देवी मारुं सेवन करो मारे आधीन थइ रहो मारा उपर प्रीति राखो ॥ ३ ॥

कां सोस्मितां० ॥ ४ ॥

संपूर्ण सुख कमळपर शोभी रहेला मंद हास्यवाळां । सोनाना किल्लाथी जेनुं मंदिर-निवासस्थान घेरायेलुं छे एवां । जळस्वरूपे जगतना जीवनना आधाररुप एवां । दयाथी भीना हृदयवाळां, भक्तोनी थोडी सेवाथी घणुं फळ आपनारां, कोमळ स्वभावनां स्नेहथी भरेला हृदयवाळां । चंद्रमारुपे अमृतथी औषधीओने पोषी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जगतने जीवाडी रहेलां। तेजोमय स्वरुपवाळां, भक्तोना शत्रुओने तपावनारां रत्न सुवर्णादिनां आभूषणोथी देदीप्यमान देखातां एवां, पूर्ण मनोरथवाळां सदा संतोष पामेलां। वरदान ऐश्वर्यदान समृद्धिदान वगेरेथी भक्तोना मनोरथ पूर्ण करनारां। कमळासनपर बेठेलां, सुवर्ण जेवां कमळ पुष्प सरखी कांतिवाळां। विविध ऐश्वर्य गुण युक्त एवां, जगतनी वाणी स्वरूप एवां श्री देवी माताने मारे घेर निवास करवा बोलावुं छुं. ॥ ४ ॥

चंद्रां प्रभासां० ॥ ५ ॥

चंद्ररुप एवां चंद्रनी पेठे अमृत वर्षावनारां, जीवन आपनारां आनंद आपनारां। दिव्य कांतिवाळां, ऐश्वर्य समृद्धि अने वरप्रदान वगेरे भक्तोने आपवाथी जेनी कीर्ति चौद ब्रह्मांडमां गवाइ रही छे एवां। अलौकिक गुणोथी इन्द्रादि देवताओथे पूजायेलां ब्रह्मादि देवोना शिरोमणीरुप एवां, भक्तोने थोडी भक्तिथी मोटां फळ आपनारां, दरिद्रता वगेरे दुःखने हरनारां। उदार एवां। अनेक गुणोथी युक्त एवां, कमळने धारण करनारां, पद्मासन पर बेठेलां, ई कारथी ओळखातां ई जेनुं स्वरुप छे एवां श्री देवीने हुं शरणे जाउं छुं, हे श्री जगज्जननी मा हुं तमारी पासेथी वरदान मागुं छुं के मारां दुःख नाश पामो. ॥ ५ ॥

आदित्यवर्णे० ॥ ६ ॥

सूर्यसरखी कांति प्रकाशवाळां एवां हे भगवति श्रीदेवी, तमारा तपना प्रभावथी वनस्पतिरूप बीलीनुं वृक्ष उत्पन्न थयुं छे. बिल्ववृक्ष तमाराथी उत्पन्न थयुं छे माटे ते बिल्ववृक्षनां पाकेलां फळ में करेला स्तुतिपाठ होमादि प्रयोग रूपी तपथी थयेली तमारी कृपा वडे मारामां रहेला अंदरना लोभ मोह अदेखाइ मननी नबळाइ अज्ञान पाप कंजुसाइ वगेरे दोषरूप मानसिक अलक्ष्मी, तथा निर्धनता, बीजाथी पीडा पामवी, शत्रुथी पराभव पामवो, ऐश्वर्य कांति प्रतिभा हराईजावां राजाथी लाभ न मळवो वगेरे बहारनो दुर्गतिओरूपी बाह्य अलक्ष्मी ए बधांनो बीलीनां फळ नाश करो अर्थात् बिलीनां फळना सेवनथी तथा तेनो होमादि द्वारा उपयोग करवाथी ए बधां अमारां दुःखो नाश पामो ऋद्धि सिद्धि प्राप्त थाव. ॥ ६ ॥

उपैतु मां० ॥ ७ ॥

हे श्री देवी माता, हुं तमने प्रार्थना करूंछुं के महादेव छे मित्र जेना एवा कुबेर चिंतामणि अने तेनी साथे कीर्ति ए बधुं मने मळो। सौराष्ट्र उत्तम राज्यमां हुं उत्पन्न थयो छुं त्यां वसता उमा महेश्वर कुबेर मने धन धान्यादि समृद्धि आपो। सुखदायक सौराष्ट्र कच्छ श्रीकृष्णनी पवित्र भूमिनां प्रभास गिरनार द्वारका आशापुरा कोटेश्वर श्री भुवनेश्वरी वगेरे पवित्र तीर्थक्षेत्रोमां सृष्टिना आरंभथी प्रगट थइ वसेला एवा भगवान शंकर पार्वती अने कुबेर तेना गणो साथे मारे त्यां पधारो तथा मने कीर्ति ऐश्वर्य धन धान्य ऋद्धि सिद्धि समृद्धि आपो।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देवताओना मित्र अर्थात ज्यारे ज्यारे देवताओ पर दुःख पडे छे त्यारे ते दुःखोने दूर करनारा महादेव, पार्वती अने कुबेर मणिभद्र नामना कुबेरना कोशाध्यक्ष साथे मारे त्यां निवास करो। सुंदर राज्य सौराष्ट्र-कच्छ काठीआवाडमां प्रगट थइ निवास करी रहेला उमा महेश्वर कुबेर मने कीर्ति यश अने ऐश्वर्यादि समृद्धि आपो ॥ ७ ॥

क्षुत्पिपासा० ॥ ८ ॥

शंकर पार्वती अने कुबेरनी कृपावडे हुं भुख अने तरशथी दुःख देनारी लक्ष्मीनी मोटेरी बेन एवी अलक्ष्मीनो दरिद्रता शोक दुःख स्वजनवियोग रोग मननी चिंता दुःख देनारी पीडा वगेरेनो नाश करुं छुं. हे कुबेर मारा घरमांथी धनहीनपणाने तथा बधा वैभव भोगववानी वस्तुओना अभावने संपूर्ण रीते मटाडो ॥ ८ ॥

गंधद्वारां० ॥ ९ ॥

सुगंधने उत्पन्न करनारां सुगंधमय जेनां मंदिरो छे एवां, कोइथी पराभव न पमाडी शकाय एवां, आ भूमंडळ उपर थइ गयेला हजारो राजाओये पोताना ताबामां मानेलां छतां कोइना ताबामां नहीं रहेनारां, हमेशां उत्पन्न करेला छ रसवाला खाद्यपेयादि भोग्य वस्तुओथी भरेलां. तृप्त पुष्ट थयेलां अने तेथी ते वस्तुओवडे भक्तोने पोषवा समर्थ अने पोषतां एवां। सुकां अने ताजां गायुंना छाणथी जेनो पृष्ठभाग उपरनो भाग छवाइ-पथराइ गयो छे एवां अर्थात् गाय वगेरे हजारो पशुओथी भरपुर पृथ्वी स्वरुप एवां, सर्व प्राणिमात्र उपर प्रभुत्व राखनारां प्राणिमात्रने ताबामां राखनारां. सर्व स्थावर जंगमरुप सृष्टिना उत्पति पालन अने नाश करनारा ब्रह्मा विष्णु महेश्वर तथा इंद्रादि देवताओ अने ब्रह्मांड जेनी सत्ताना प्रभावथी प्रवर्ती रहेल छे एवां उपकार अने शिक्षा करवामां समर्थ एवां पृथ्वी रूपधारिणी लक्ष्मी देवीने हुं मारे घेर बोलावुं छु ॥ ९ ॥

मनसः काम० ॥ १० ॥

मनना काम अभिलाषने विविध मनोरथनी सफळताने। संसारनी सर्व वस्तुनी के मन वांछित कार्यनी सिद्धिरूप संसारी जनोना मनना आशय हार्द ज्ञानने बीजाना अंतःकरणने ओळखवाना ज्ञानने। वाणीनी सत्यताने वचन सिद्धिने। हाथी घोडा गायो वगेरे अगणित पशुओनी विपुलताने लाभने.। बीजा शहेर देश देशांतरमां वसता अने अमारा परिचयमां आवता मनुष्योनी प्रीति वात्सल्य सर्वस्व अर्पण करी देवा जेटला स्नेहने अने ए स्नेहाधीन थयेलाओ पासेथी विविध वस्तुओने अमे मेळवी शकीए। हे भगवती लक्ष्मी देवि हे मा, हुं तमारो उपासक भक्त छुं तो मारे त्यां सुवर्णादि समृद्धि ऐश्वर्य अने कीर्ति निवास करो स्थिर थाव. ॥ १० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कर्दमेन प्रजा० ॥ ११ ॥

कर्दम नामना ऋषिवडे लक्ष्मी पुत्रवाळां कहेवाय छे माटे हे कर्दम ऋषि, तमे मारे त्यां अवतार ल्यो मारे घेर निवास करो अने तमारां माता जगज्जननी कमलपुष्पमाळा धारण करनारां माता लक्ष्मीने मारा वंशमां वसावो निवास करावो। तमे मारे घेर वसशो एटले माता लक्ष्मी देवी पण स्वाभाविक रीतेज पुत्रस्नेहवडे तमारी पाछळ मारे घेर पधारशे. ॥ ११ ॥

आपः सृजन्तु० ॥ १२ ॥

जळ देवताओ स्निग्ध पदार्थोने उत्पन्न करो जळदेवता रूपे वरुण स्वरूपे रहेलां, ब्रह्माडमां ज्यां ज्यां जळ तत्व देखाय छे त्यां त्यां ते ते स्वरूपे रहलां एवां भगवती अमारे घेर अमारा कुळमां वसो। तथा सुखी जीवन गाळवानी इच्छावाळां अमो तथा अमारां आप्तजनोना-स्त्री पुत्र पौत्रादि कुटुंबी जनोना शरीरोमां स्निग्ध पदार्थोनो विपुलता करो। दुध दही घी गोरस वगेरे वस्तुओनो अमारे घेर अभाव न थाय के जेथी अमे देव पितृ अतिथि वगेरेनो सेवा करी शकीये अने शास्त्र विहित यज्ञयागादि कर्मो करी शकोये के जेथी अमने उत्तम लोकोनी प्राप्ति थाय। हे लक्ष्मीना पुत्र चिक्लीत ऋषि मारे घेर निवास करी रहो अने वाणीनां अधिष्ठात्री देवी एवां लक्ष्मी माताने मारा वंशमां निवास करावो. (नीचदेवीं) अधमोद्धारिणी अंत्यज अतिशूद्र दरिद्री निर्धन भिखारो एवां अधम मनुष्यो पण तमारी सेवा करे तो तेनो उद्धार करनारां तेओनो धन धान्य समृद्धिथी जगत्मां उदय उन्नति करी प्रकाशमां लावनारां एवां जगज्जननी लक्ष्मी देवोने मारे घेर वसावो. ॥ १२ ॥

आर्द्रां पुष्करिणीं० ॥ १३ ॥

दिग्गजोनी सुंढ्योमां धारण करेला पाणीथी भरेला सोनाना कळशोथी भीनां थयेलां। रसरूप जळरूप। जे लक्ष्मी देवी उपर सुंढ्यना अग्रभाग वडे अभिषेक करवा दिग्गजो तैयार थाय छे एवां। रसरूपे जगत्नां दुःख रोग दरिद्रतानो नाश करनारा भगवान् शंकरनां करुणारूप एवां दयार्द्रहृदयनां, भक्तोपर अनन्य स्नेह राखनारां। कमल पुष्पमाला धारण करनारां. कमळासनपर बेठेलां, जगतने पुष्ट करनारां। छ रसो उत्पन्न करी जगतनुं पोषण करनारां जगतने जोवाडनारां। गौरवर्णवाळां, चंद्ररूपे अमृत वर्षावनारां औषधीरूपे जगत्मां वसनारां। सुवर्ण जेनुं रूप छे एवां लक्ष्मी माताने हे अग्नि मारे घेर तेडी लावो ॥ १३ ॥

आर्द्रां यः करिणीं० ॥ १४ ॥

शीतळ गुणवाळां जळ स्वरूपे जगत्ने धारण करनारां। दंड धारण करनारां, दुष्टोनुं दमन करवा हाथमां दंड धारण करनारां धर्मदंड स्वरूप। सुंदर वर्णवाळां,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुवर्णरूपे जगतमां दृश्य थतां सोनानां आभूषणो धारण करनारां, सूर्यरूप सूर्यरूपे प्रकाशतां सूर्यने प्रकाशित करनारां. सुवर्ण जेनुं शरीर छे एवां लक्ष्मी देवीने हे अग्नि मारे घेर निवास करावो ॥ १४ ॥

तां म आवह० ॥ १५ ॥

हे अग्नि भगवान्, उपर कहेला गुण अने स्वरूपवाळां लक्ष्मीने मारे घेर वसावो। लक्ष्मी देवी पोतानो चंचळ स्वभाव छोडी स्थिर थइ मारे घेर वसे एम करो। लक्ष्मी मारे घेर वसशे एटले हुं अढळक धनने सोनाने गायोने दासीयोने घोडाओने तथा पुत्रोने मित्रोने नोकरो विगेरेने मेळवीश. अने तेओने सुखी करीश. ॥ १५ ॥

यः शुचि प्रयतो० ॥ १६ ॥

लक्ष्मी धन सुवर्ण मेळववानी ईच्छावाळो जे मनुष्य पवित्र अने सावधान थइ संकल्प न्यास ध्यान वगेरे विधिपूर्वक हमेशां श्रीसूक्तना पंदर मंत्रोथी घीनो होम करे अने-लक्ष्मीनी इच्छावाळां जे स्त्री पुरुष के विद्यार्थी आ श्री सूक्तना पंदर मंत्रोनो हमेशां पाठ करशे ते विद्याने, अढळक सुवर्ण धनने, पत्नी पुत्र पौत्र दास दासीओने मेळवशे अने तेना बधा मनोरथ पुरा थाशे. ॥ १६ ॥

॥ अथ पुरुषसूक्तम् ॥

॥ राजवैद्यकृत गुजराती भाषान्तर ॥

हरिः ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥
सभूमि ँ सर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥

जे पुरुषरूप ईश्वर, सर्वे प्राणिमात्रना शरीरमां रहेल छे, सर्वे प्राणिमात्रने जीवाडी रह्या छे ते ब्रह्मांड देहरूपी रस पारदरूप परमात्मा हजारो मस्तकवाळा छे. हजारो नेत्र वाळा छे. हजारो पगवाळा छे. अर्थात् पारदरूप ईश्वर सर्वे व्यापी छे. रसो वै सः ते पारदरूप ईश्वर भूमंडळना अणुपरमाणुमा चारेकोर दशेदिशामां व्याप्त छतां नाभिथी हृदय पर्यंत देवपितृ विद्याधर गंधर्व यक्ष मनुष्य वगेरेमां दश आंगळ प्रमाणनां स्थानमां रहे छे। अर्थात् पारद सर्वे जगत्ने जीवाडनार छे प्रत्येक शरीरमां पारद तत्त्व रहेलुं ते सजीव ईश्वर छे तेनुं स्थान दश आंगळ नाभिहृदय छे अने बाह्य जगत्मां मूर्तिरूपे एक स्थानमां रहे छे. अर्थात् परमात्मा जगद्व्यापी छतां मूर्तिरूपे प्रतिष्ठा पामी एक स्थाने पण निवास करी तेनुं पूजन अर्चन करनारा भक्तोनुं कल्याण करे छे. ॥ १ ॥

पुरुषऽएवेद ँ सर्व्वं यद्भूतं यच्च भाव्यम् ॥
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जे जगत् पूर्वे काळमां हतुं हाल वर्तमान काळमां देखाई रयुं छे अने भविष्यमां रहेवानुं छे ते बधुं पारद रुप सर्वव्यापि पुरुष परमात्माज छे. तेमज अमृतपणानो स्वामी देव मनुष्यादिने अमरपणुं आपनारो मुख्य सत्ताधारी पण ते पारदरूप परमात्माज छे अन्नरूप भक्ष्यपदार्थोद्वारा प्राणिमात्रना शरीरमां प्रवेशी जगत्‌ने विकास अवस्थामां पारदरूप ईश्वर लावी रह्या छे ॥ २ ॥

एतावानस्य महिमातोज्ज्यायाँश्च पूरुषः ॥
पादोस्य विश्वाभूतानि त्रिपादस्यामृतन्दिवि ॥ ३ ॥

आ पारदरूपी पुरुष परमात्मानो महिमा प्रभाव शक्तिनी मर्यादा-माप नथी छतां परमात्मा आ दृश्यमान ब्रह्मांडथी पण मोटा छे । आ ब्रह्मांडनां प्राणिमात्र एतो परमात्मानां एक चतुर्थांश शक्ति छे अने परमात्माना त्रण पाद बाकीना त्रण भाग आकाशमां अमृतरूप सूर्यरूपे छे जे स्वर्गादि लोकमां शंकर स्वरूप ईश्वर श्री भगवती साथे वसे छे परमात्मानुं अमृततत्त्व पोतानो साथेज छे ॥ ३ ॥

त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ॥
ततो विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥

त्रण भागना पोताना प्रभाव शक्तिथी ते पुरुषरूपी परमात्मा आकाशमां सूर्यरूपे उदय पामे छे अने ते परमात्मानो एक अंश फरी फरी जगतमां उत्पन्न थाय छे जगत्‌नी उत्पत्ति स्थिति प्रलयरुपी काळमां हमेशां एक अंशथी प्रवृत्त रह्या करे छे अने अवतार धारण करीने तथा मूर्तिरुपे प्रतिष्ठा पामीने तथा पारदरुपे विविध संस्कार युक्त थइने जगतनुं वहन कर्या करे छे अने पछी श्री भगवतीनी साथे जोडाइने देव मनुष्यादिमां व्यापी रहे छे भक्ष्य भोज्यादि पदार्थोनुं अशन भक्षण अने अनशन उपवास उपरज जे जगतनो आधार छे अने ए बे बाबतज स्थावर जंगमात्मक जगत् कहेवाय छे ते बे वस्तुरुप पोते थइ ए बे बाबत तरफ मुख्य लक्ष्य राखीने परमात्मा आ समग्र ब्रह्मांडमां व्याप्त थइने रहे छे ॥४॥

ततो विराडजायत विराजोऽअधिपूरुषः ॥
सजातोऽअत्यरिच्यतपश्चाद् भूमिमथोपुरः ॥ ५ ॥

ब्रह्मांडरुपी देहवाळा ते विराट पुरुष परमात्माथी विराट ईश्वरना एकपाद अंशरुपे उत्पन्न थया छे अने ते विराट पुरुषमांथी मनुष्य देहने आश्रय करीने लौकिक मनुष्यलोकमां पुरुषरुपे अवतरे छे पुरुषरुपे अवतरेला एवा ते परमात्मा इतर मनुष्यो करतां गुण कर्म रूपादिथी विशेष जुदा स्वरुपे रहे छे । ईश्वर विराटरुपे थया पछी पृथ्वीने उत्पन्न करे छे पछी शरीरोने उत्पन्न करे छे अने पछी पोते मनुष्यथी पर एवा गुण कर्म रुपादिथी विशेष यज्ञ पुरुषरुपे अवतार ल्ये छे ॥५॥

तस्माद्यज्ञात्सर्वहुतःसम्भृतम्पृषदाज्यम् ॥
पशूँस्ताँश्चक्रेवायव्यानारण्याग्ग्राम्याश्चये ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वे हुतद्रव्यनो भोक्ता सर्वे जेमां होमाय छे सर्वे जे जे हुतद्रव्यरूप छे एवा ते यज्ञरुप परमात्माये आडमांथी स्त्रवतुं एवुं घी उत्पन्न कर्युं अने आकाशमां उडनारां प्राणीओ जंगलमां रहेनारां तथा गाममां वसनारां पशुओने पण उत्पन्न कर्या छे ॥ ६ ॥

तस्माद्यज्ञात्सर्व्वहुतऽऋचः सामानिजज्ञिरे ॥
छन्दा ँ सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥

देव मनुष्य वगेरेए आपेलां हुतद्रव्यने स्वीकारनारा ते यज्ञ पुरुषथी ऋग्वेद अने सामवेद उत्पन्न थया तेज यज्ञ पुरुष परमात्माथी अथर्ववेद उत्पन्न थयो अने तेज परमात्माथी यजुर्वेद उत्पन्न थयो ॥ ७ ॥

तस्मादश्श्वाऽअजायन्तयेके चोभयादतः ॥
गावो हजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥ ८ ॥

ते यज्ञपुरुष परमात्माथी घोडा उत्पन्न थया तेमज उपर नीचे दांतवाळां बीजा पशुओ तथा गायुं बकरीयुं अने घेटां वगेरे ते यज्ञपुरुषथी उत्पन्न थयां ॥८॥

तंयज्ञम्बर्हिषिप्रौक्षन्पुरुषञ्जातमग्रतः ॥
तेनदेवाऽअयजन्त साद्ध्याऽऋषयश्चये ॥ ९ ॥

सर्वेथी प्रथम उत्पन्न थयेला यज्ञनारायणरुप एवा ते पुरुष परमात्माने प्रत्यक्ष यज्ञमां स्थापित करीने यज्ञना आदि अधिष्ठाता पूज्य देव तरिके देव ऋषि वगेरेये अभिषेक कर्यो। ते यज्ञनारायणने अध्यक्ष देव स्थापीने देवो साध्यदेवो अने बीजा देवर्षिओ वगेरे यज्ञद्वारा पूजवा लाग्या ॥ ९ ॥

यत्पुरुषं व्यदधुः कतिधाव्यकल्पयन् ॥
मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादावुच्च्येते ॥ १० ॥

जे पुरुषनी देव साध्यदेव ऋषिओये यज्ञनारायणरुपे शरीररुपे स्थापना करी तो तेनां अंगोपांगनी केवी रीते व्यवस्था करी अर्थात् एना अवयवोनी व्यवस्था कइ रीते करी ?। ते विराट यज्ञपुरुष परमात्मानुं मुख शुं हतुं बाहु-हाथ कोण हतुं उरु-साथळ अने पग कोण कहेवाया ? ॥ १० ॥

